॥ श्रीकृष्णाय नमः ॥

मीमांसकमूर्धन्यमणिश्रीमन्मुरारिमिश्रविरचितम्

त्रिपादनीतिनयम् ।

अग्निहोत्रं तथा दर्शः पूर्णमासः पशुस्तथा ।
चातुर्मास्यानि सोमश्च क्रमात्पञ्चविधो हरिः ॥
(श्रीमद्वल्लभाचार्यचरणाः)

ॐ नमः सरस्वत्यै ॥ आम्नायस्य ॥ उक्तं कार्यमर्थं प्रतिपादयतो वेदस्य प्रामाण्यम् । न वार्थवादानां कार्यार्थिता विधिना सहैकवाक्यत्वे प्रमाणाभावात्, तस्मादप्रामाण्यमिति, परेषां पूर्वपक्षः ।

ननु तेषां सिद्धेऽपि व्युत्पत्तेः कथं कार्यार्थत्वमेव । तत्राध्ययनविधिवत्वात् सिद्धस्यार्थस्य निष्प्रयोजनत्वादिति केचित् ।

तदयुक्तम् । तथा सति तद्बलादेवैकवाक्यत्वप्रसङ्गात् । तस्माद्धर्मे प्रामाण्यं सिद्धार्थतया न सम्भवति । तच्चिन्तयामीत्यभिप्रायः ।

कथमेकवाक्यताविरहः कार्यस्य कार्येण सहान्वयात् । अर्थवादार्थस्य च सिद्धत्वात् । कथं तर्हि नियोज्यान्वयो, नियोगस्याकार्यत्वात् । तत्र निरूढे नियोगेन सिद्धार्थान्वयो, नियोज्यान्वयस्तु अनिरूढ एवार्थ इति केचित् । तन्न, निर्युक्तिकत्वात् । तथाप्यर्थवादानामनिरूढ एवान्वयोऽस्त्विति बोधान्निवृत्तेः । अनिर्वाहकत्वादनिरूढिदशायां नान्वय इतिवत् । एवं तर्हि न सिद्धत्वे हेतुः स्यात् ।

तथापि निरूढिदशायामनन्वये सिद्धत्वं हेतुरिति चेत्, न; कालादेरप्यन्वयदर्शनात् । तेषामपि क्रियानिवेशे न साध्यतेति चेत्, नः अन्योन्याश्रयापत्तेः; क्रियान्वये साध्यता साध्यत्वेच क्रियान्वय इति । तस्मादेवं वाच्यम्, कृत्यनुरञ्जनयोग्यं कार्यमत्राभिप्रेतम् । तच्च द्वयम् । नियोज्यकोटिर्विषयकोटिश्च । कोटिद्वयबहिर्भूतं सिद्धमभिप्रेतम् । न चातीतस्य चोदनादेर्वर्तमानस्य च वायुक्षेपिष्ठत्वादेः कोटिद्वये योग्यता विद्यत इति नैकवाक्यत्वम् । राद्धान्तस्तु । यद्यप्येकवाक्यता न प्रतीयते, तथाप्यध्ययनविधिना सर्वस्य वेदस्य प्रयोजनवदर्थपरत्वापादनात् ।

अर्थवादानां तत् सिध्यर्थं रूपभङ्गेनाप्येकवाक्यत्वं लक्षणयाङ्गीकर्तव्यम् ।

विधेरपीति। कर्तव्यतात्वेन प्राशस्त्यस्यापेक्षणादिति। तदयुक्तम्। एवं विचारे प्रतिज्ञातप्रामाण्यानाक्षेपात् पूर्वपक्षसङ्गतिर्न स्यात्।

ननु न प्रतिज्ञाक्षेपेण सर्वत्र सङ्गतिर्न हि ग्रहाधिकरणे। शेषः परार्थत्वादिति प्रतिज्ञा निर्विषया भवति। एकग्रहशेषत्वेऽपि सम्मार्गस्य प्रतिज्ञाया अविरोधात्। सङ्गतिस्तु प्रतिज्ञाया निर्वाहेऽपि यद्विचार्यतया प्रतिज्ञातं तद्विचार एव भवति। प्रतिज्ञातश्चात्र वेदप्रामाण्यविचारः। अर्थवादा अपि वेदा एव इति कथमसङ्गतिः। एतमन्तरेणापि प्रतिज्ञासिद्धेः। प्रतिज्ञायां नायमर्थवादसिद्धान्तहेतुः, सम्बद्धः स्यादिति चेत्, न; अनुमानैकदेशभूता हि प्रतिज्ञा तत्साधकेन हेतुना सम्बध्यते। इह तु विचारस्य प्रतिज्ञासम्बन्धः सङ्गतिनिमित्तम्। सोऽपि च न हेतुत्वलक्षणः, किन्तु विषयरूपः, तेन प्रतिज्ञायाः प्रामाण्यविचारविषयत्वादस्ति प्रामाण्यविचारस्य प्रतिज्ञायां सङ्गतिः। हेतुस्तु सिद्धान्तस्य सिद्धान्तेनैव सम्बध्यते, न प्रतिज्ञया।

स्यादेतत्। एवं तर्हि तस्य निमित्त परीष्टिरित्यध्यायप्रतिज्ञया सम्बन्धः स्यात्। चोदनासूत्रे तु वस्तुप्रतिज्ञा, न तु विचारप्रतिज्ञा, तत्कथमिदमधिकरणं विनापि सिध्यन्त्या प्रतिज्ञया सङ्गतं स्यात्, नैवम्; तत्सम्बधस्य सङ्गत्यनुपयुक्तत्वात्। द्वादशाध्यायी च तया प्रतिज्ञया सम्बद्धा, न तु प्रथमाध्यायमात्रम्। अतश्च तस्मिन्सूत्रे यावद्वक्ष्यमाणविशेषो धर्मश्चोदनात्मकसम्पूर्णवेदलक्षणक इति प्रतिज्ञा। तत्र यथेतरेषामध्यायानां सामान्यतो धर्मानाक्षेपेऽपि सम्बन्धः, तथाऽस्यापि सामान्यतश्चोदनाप्रामाण्यानाक्षेपेऽपि, उच्यते।

स्यादेतत्। यदि तस्य निमित्तपरीष्टिरिति सूत्रे प्रामाण्यमात्रप्रतिज्ञा स्यात्। किन्तु तच्छब्दस्य प्रकृतमात्रवाचित्वात्। चोदनाप्रामाण्यस्य धर्मस्य प्रकृतत्वात्तन्निमित्तचोदनाप्रामाण्यमेवाध्यायार्थतया प्रतिज्ञातमिति कथमचोदनात्मकस्यानुवादस्य चिन्ता सङ्गता स्यात्। अस्यापि चोदनात्वेनाप्रामाण्यं व्युत्पाद्यमिति चेत्, न; न व्युत्पाद्यत्ववशात् सङ्गतिः, किन्तु विचार्यवशात्। विचार्यत्वं चोदनात्वे सतीति कथं सङ्गतिः स्यात्।

नन्वेवमेव चोदनाक्षेपे प्रामाण्याक्षेपोऽपि इतराध्यायवत् सङ्गतिसिद्धेः। किं सर्वाक्षेपेण। सत्यम्. अतिप्रौढिस्तु सेति केचित्। अन्ये तु चोदना सूत्रे को धर्म इत्येतस्मिन् प्रश्ने न प्रत्यक्षादिगम्यः। किन्तु चोदनागम्य इत्युक्तेः, तस्य निमित्तपरीष्टिरिति सूत्रेण प्रतिज्ञानिर्वाहोचितमेव प्रामाण्यं जिज्ञासितम्। न तु चोदना प्रामाण्यमात्रं सूप्रतिज्ञानं वर, प्रतिज्ञासु त्वस्यैव जिज्ञासितत्वात्। तन्निर-

पेक्षज्ञानां(तायां) प्रामाण्यमात्रस्याध्यायार्थतयाऽभिधानानुपपत्तेः। अथातः शेषलक्षणमिति तु न प्रतिज्ञानान्तरमध्यायार्थप्रतिज्ञानमिति ॥ अत्र शेषत्वमात्रमेवाध्यायार्थः। इह तु न तथा। ततश्च पूर्वपक्षेऽपि प्रतिज्ञायाः साधुत्वे कथं सङ्गतिरिति।

न च प्रथम एव पादे प्रामाण्यं व्युत्पाद्यम्, द्वितीये विध्यनुवादमन्त्राणामुपयोगकथनम्, तृतीये तु स्मृतिप्रामाण्यम्, चतुर्थे नामधेयोपयोग इति, ततश्चौदुम्बरमन्त्रानुवादाद्यधिकरणानां नासङ्गतिरिति वाच्यम्। एवं सत्येकाध्यायार्थत्वानुपपत्तेः। तस्मादेकवाक्यतयैव पूर्वपक्षः।

तथा सति साक्षादङ्गद्वारा वा सर्वेषामनुवादैकवाक्यतया प्रामाण्याक्षेपात्। प्रतिज्ञाया निर्विषयत्वेनासाधुत्वात्। यद्यपि किञ्चिन्निरनुवादकमपि वाक्यं तथाप्येकस्या अपि चोदनायाः प्रामाण्याक्षेपेण स्वभावसिद्धमेव शब्दस्याप्रामाण्यं पौरुषेयत्वस्याप्यप्रामाण्योपाधित्वव्यभिचारादिति सर्वेषामेवाप्रामाण्यम्।

न च एकवाक्यताभावेप्यर्थवादाप्रामाण्ये चोदनाया अपि किं न स्यात्। न। सिद्धार्थानामनुवादानामप्रामाण्ये व्युत्पत्त्यभावस्यैवोपाधित्वात्। परेषां सिद्धेऽपि व्युत्पत्तिरस्तीति चेत्, न; तथापि व्युत्पत्तेरभावाद्धर्मेऽपि नानुवादानामप्रामाण्येन देशनाया अपि स्यात्। अनुवादानामप्रामाण्ये तदनुवादकतया नार्थज्ञानम्, स्वाध्यायाध्ययनविधेः प्रयोजनतया गृह्णाति। किन्तु स्वर्गादि, ततश्चान्यपरत्वात्सर्वा एव चोदना न प्रमाणमिति चेत्, न; विधेः प्रयोजनान्तरानपेक्षणात्। अत एव नियोगस्य प्रयोजकत्वात्। कामाधिकारेऽपि न स्वर्गादेः प्रयोजनतया अन्वयः। किन्तु नियोज्यविशेषणतयैव।

कथं तर्हि वेदस्यार्थपरत्वमिति चेत्, न; यतोऽर्थाज्ज्ञातस्यार्थज्ञानस्य विधिना पश्चादधिकारपर्यवसानार्थं स्वीकारात्। तच्च यथा जातमेव स्वीकारोचितं व्यापकमव्यापकं वा सिद्धान्तेऽपि नित्यादीनामव्यापनात्। न च स्वर्ग इति चेन्नियोज्यविशेषणत्वमेवार्थज्ञानस्य अनियोगफलत्वात्, वैतुष्यवत्। आचार्यविधिलब्धानुष्ठानेऽध्ययने नियोज्याभावात्। न च वेदार्थज्ञानकामनापि युज्यते। यदि प्रागसौ ज्ञाता किमर्थं काम्यते। न चेत्तथापि न कामना। तस्याज्ञातविषयत्वात्। सामान्यतो ज्ञातं विशेषतो ज्ञानार्थं काम्यते। काव्यालङ्कारार्थवदिति चेत्, न; सामान्यतो वेदार्थस्य नित्यनियोगरूपस्य वेदमन्तरेणाभ्युदयकारितया पुम्वाक्यमात्राप्रमाणान्तरविरोधेन प्रत्येतुमशक्तेः। वेद एवानुमितः प्रमाणान्तरमन्तरेण

बाधेन बोधयतीति चेत्, न; तस्य विशेषणशक्तस्य सामान्यबोधनासम्भवात्। काव्ये तु पुम्वाक्यलिङ्गकेनानुमानेनैव कश्चिदन्यार्थोऽभ्युदयकारीति लक्ष्यते।

यदि च विधितः पूर्वमेव स्वाध्यायस्यार्थवत्ता ज्ञायते तदा; किं तदङ्गिनोऽध्ययनविधानेन नियमार्थो विधिरिति चेत्, न; लौकिकेऽर्थज्ञाने नियमाभावात्। क्रत्वर्थत्वे च निरधिकारत्वात्। किञ्चित् क्रियार्थज्ञानं न त्वधिकारिविशेषणं स्यात्। पुरुषार्थे च नियमेऽर्थज्ञानमाश्रयः स्यात्। अधिकारी त्वन्य एव प्राङ्मुखभोजन इवायुष्कामः। अर्थज्ञानप्रवृत्तिर्वा निमित्तं स्यात्। प्रतिग्रहादाविवार्जनकामस्य प्रवृत्तिः। न त्वर्थज्ञानं फलम्।

न च स्वाध्यायादेर्नियमः सम्भवति। अन्याप्रसक्तेः। नन्वेकवाक्यतयापि कथं पूर्वपक्षः, सा हि क्रियाकारकादिपदेषु विभक्त्यादिबलाद्भवति। विभक्तीनां सन्निहितपदार्थप्रतियोगिकारकत्वस्याभिधानात्। इह तु द्वयोरनुपहताख्यातयोर्न व्युत्पत्तिसिद्धैकवाक्यता वाक्यभेद एव तु व्युत्पन्नः। उच्यते। सिद्धार्थसाध्यत्वयोरप्याख्यातयोरेकवाक्यत्वं व्युत्पन्नं हेतुहेतुमद्भावेन चान्वयः। यथा मलिनं ते वपुर्वर्तते स्नाया इति, मलिनः स्नायादिति नोदाहरणम्। तत्र मलिनस्य कर्तृत्वेनाधिकारित्वेन चान्वितस्य साध्यकोटित्वात्, हेतुत्वेनान्वयाभावात्। एकाख्यातत्वाच्च। तच्चेदं मलिनत्वस्यासिद्धहेतुत्वमेव। किन्तु करणत्वादिकोटिबहिर्भूतम्। अतएव न साध्यताप्रसङ्गः।

मलिनत्वं हि स्नापनयेच्छाद्वा स्नानहेतुरिति केचित्। तन्न· इच्छायामपि भूतायामित्यसाधनताज्ञानमन्तरेण कर्तव्यताज्ञानाभावात्। ज्ञप्तिसिद्धावेव व्यापारात्। ज्ञानं चेत्रं सिद्धिहेतुः स्यात्। न च मलिनत्वं तस्य चान्वयो वक्तव्यो न तु ज्ञानस्य। सिद्धहेतोर्हेतुत्वेनाभिधानम्। किमर्थं स्वरूपमात्रज्ञानस्यैव। इच्छाजनकत्वात्। तस्माद्भवतीष्टसाधनता स्नानमलिनत्वादिति ज्ञप्तिहेतुतयैवान्वयः। तत्र यदि प्रतिबन्धग्राहकप्रमाणमस्ति तदानुमानप्रमेयप्रमाणतया अनुबोधयन्ती देशना नाप्रमाणम्।

अथ नास्ति तथापि विपर्ययात्स्मृतिमात्रजनिका सापेक्षत्वान्नप्रमाणम्।

ननु शब्द एव प्रतिबन्धं बोधयिष्यति, अस्मिन्नेवांशे प्रमाणं भविष्यति, अनुमेयत्वांशो भवत्वप्रमाणम्। मैवम्। नह्यनुमानवाक्यानि हेतुस्वरूपतत्प्रतिबन्धादिप्रतिपादकत्वेन व्युत्पन्नानि। किन्तु प्रमाणान्तरसिद्धहेतुस्वरूपप्रतिबन्धादिस्मरणद्वारानुमानज्ञानोत्पादकानि। अतः शब्द एवानुमानवाक्यस्य

नास्ति । शब्दाभावेन प्रामाण्ये प्रतिज्ञामात्रेण साध्यता प्रतीतौ हेतुत्वादिप्रयोग-वैयर्थ्यात् । सहेतुकं कार्यं प्रतिपन्नम् । सहेतुकत्वाय प्रतिबन्धमाक्षिपतीति चेत्, न; प्रतिबन्धस्य प्रतीतिहेतुत्वात् । तदाक्षेपमन्तरेण प्रतीतेरेव सिद्धत्वात् । न तु सर्वत्राक्षेपः सम्भवति । रुद्ररोदनादिहेतुस्वरूपे नित्यानित्यसंयोगविरोधात् । प्रतिबन्धस्य रजतदानेऽपि संवत्सरादर्वाक् रोदनानुपलम्भो न व्याघात् ।

केचित्तु ज्ञापकातिरिक्तसम्बन्धापेक्षित्वाद्धेतुत्वस्य चानुवादे सम्भवात्, न हेतुत्वापेक्ष इत्याहुः । तन्न । रोदनप्रभवबर्हिर्द्वारा रजतदानयोरोदनाजनकत्वा-त्कर्तव्यतायाश्च कार्यकारणभावैकार्थसमवाययोः सम्भवात् ।

नन्वेवं हेतुत्वासम्भवात् कथमन्विताभिधानम् । तदभावे च प्रतीत्यभा-वात्, कथमेकार्थप्रतीतिजनकत्वादेकवाक्यता, आपाततः प्रतीता एव वाक्यता-भङ्गे तन्निमित्तस्याप्रामाण्यस्यापि भङ्गप्रसङ्गात्, तद्भङ्गे चक्रकापत्तिरिति चेत्, तर्हि त्यजतामियमेकवाक्यता । चक्रकनिदानत्वात् । व्युत्पत्तिसिद्धैकवाक्यता न हातुमर्हति ।

न चायोग्यत्वात् प्रतीतिः सम्भवतीत्यासन्नेन विशीर्णान्येव वेदवाक्या-नीति कश्चित् । तन्न । एवमध्यवसायेन पूर्वपक्षापत्तेः ।

पूर्वपक्षिणा भ्रमज्ञानाङ्गीकारात् । भ्रान्त्यैकप्रतातिजनकतयैवैक्य-वाक्यत्वमित्यन्ये । तन्न । प्रदेशान्तरनिषिद्धस्य स्वीकारासम्भवात् । स्वसिद्धान्ततन्मूलन्यायेतरन्यायदर्शित्वात् । पूर्वपक्षिणो भ्रान्तेश्चाव्यवस्थित-त्वात् । भिन्नान्यपि वाक्यान्येवमेकवाक्यानि स्युः । अत एव भिन्नानामपि ज्ञानानां भेदाग्रहत्वात् । एकार्थव्यवहारकारितया एकतामौपाधिकीमाश्रित्य तज्जनकतया एकवाक्यत्वं सम्भवतीति निरस्तम् ।

उच्यते । नैकप्रतीतिकारित्वमेकवाक्यतावधारणे हेतुः, किन्त्वे-कार्थप्रतीतिपरत्वम् । तच्च प्रतीत्यजननेऽपि अस्ति । फलशून्यस्यापि तात्पर्यस्यानाप्तवाक्ये क्षिर(?)सम्भवात् । तदवधारणमपि योग्यतां नापेक्षते । अयोग्येष्वपि विप्रलम्भकवाक्येषु तदवधारणात् । सिद्धसाध्यसमभिव्याहा-रादिरेव तस्यावधारणे हेतुः । अत एव गङ्गाघोषादौ लक्षणा । अन्यत्वा-योग्यत्वादेकवाक्यत्वं तद्बलाच्च लक्षणया योग्यत्वमिति दुरुत्तरमितरेतराश्रयं स्यात् । तस्मादन्विताभिधान एव योग्यताकारणम् । नत्वेकवाक्यतावधारणम् । यथा च सिद्धान्ते प्राशस्त्येऽपि नया(उपनय ?)पदानां सम्भूय प्रत्येकं वा तथा पूर्वपक्षे

हेतुपनयः । न चैवं प्राशस्त्योपनय एवास्त्विति वाच्यम् । लक्षणाप्रसक्तेः । प्रामाण्यार्थं लक्षणेति चेत्, न; अव्युत्पन्नत्वात् । राद्धान्तस्तु । शङ्कितदोषाद्धि पुम्वाक्यात् प्रतीतोऽर्थः । प्रमाणभूतं हेतुमपेक्षेत निर्दोषात् वेदात् । प्रतीतस्य विशेषतोऽपूर्वस्य न हेत्वपेक्षा ।

न च तदुत्थापनमशक्यं स्वरूपभङ्गप्रसङ्गात् । न चानुवादानुरोधेन तत्स्वरूपमेव त्याज्यम्, अनुवादत्वात्तस्य प्रधानत्वात्। अतो वाक्यार्थे अपूर्वे अनुवादार्थस्य सम्बन्धानुपपत्तेः प्राशस्त्यलक्षणैव। न ह्मप्रामाण्यार्थं लक्षणा। किञ्चागृहीतर्मतिबन्धतया अनुवादार्थो न मुख्यान्वययोग्यः । गङ्गापदार्थ इव इति लक्षणा एव युक्ता स्तावकत्वेन वान्वयो दृष्ट एव । यथेयं गौः क्रय्या रुग्यपत्या इत्यादौ तद्गुणस्वरूप कथनमेवेति चेत्, नः वाक्यभेददोषात् । हेतुत्वेन तत्राप्य न्वय इति चेत्, न; असतोऽपि गुणस्य कीर्तनात् विप्रलम्भ इति चेत्, न; आप्तैरपि प्रयोगात् । एवं वरं विषं भुङ्क्ष्व मावास्य गृहे भुक्था इत्याद्युदाहार्यम्।

मुख्यार्थानुवादकतयैवानुवादानां प्रामाण्यमस्तु। किं प्राशस्त्यलक्षणयेति चेत्, न; एकस्मिन्नेव वाक्ये प्राप्तिवदनुवादश्चेत्यङ्गीकारे वाक्यभेदे प्रसङ्गादिति केचित् ।

कथं तर्हि सौर्य्यं चरुं निर्वपेदिति निर्वपतिरनुवाद इति चेत्, न; तस्यापि स्तावकत्वात् । अविधेयान्वयतया त्वनुवादोक्तिः, तन्न; क्रमेणान्विताभिधाने एकस्मिन्नपि वाक्ये पाप्त्यनुवादयोः सम्भवात् । यदि नो वादस्तदा प्राशस्त्योपनयेऽपि का विधी(?)यदि च तदपि विधीयते तदा स्वातन्त्र्येण वाक्यभेदः। तद्विशिष्टयागादिविधावपि प्राशस्त्याङ्गत्वम्, अनुवादानां विध्युद्देश्यत्वं प्रसज्येत । उपलक्षणमिति चेत्, एवं तर्हि तत्प्रमाणान्तरप्रतीतमेव भवति, न तूपादेयम्, तदा च तस्य वादः । कथं नु वादः स्यात् । विध्युद्देशप्रवृत्तकृतौ हि सिध्यतां पश्चादङ्गोपकारार्थमाप्तानां वादोऽनुवादो भवति । वेदनादि तु न तथेति केचित् ।

तदयुक्तम् । यदि तस्य नानुवादः, तर्हि वादोऽपि न स्यात् । तदा च प्राशस्त्यस्वाभाविकस्य कृतेरसिध्यतः कथं प्रथमवादोऽपि भवेत् ।

उच्यते, न वा च रोदनादीनां स्वरूपेणैव प्राप्तिरस्ति विध्यन्वयितया तु सुतरां दूरम् । तत् कथं मुख्यार्थस्यानुवादः स्यात् । यत्र तु सम्भवति तत्र भवतु तथा, तस्माल्लक्षणया प्राशस्त्यमेवोपनीयते कस्तस्यान्वय प्रकार इति चिन्त्यम् ।

अन्वय एवायं विभक्त्यन्वयकरणत्वादिवत् न त्वस्याप्यन्वयान्तरापेक्षा विद्यत इत्येके। तन्न, एवं तर्हि विध्युद्देशतापत्तेः । विभक्तिवत् ।

न च फलसाधनत्वं प्राशस्त्यं येनान्वयप्रकारता स्यात् । किन्तु तद्वशादन्योत्कृष्टत्वम् । भवतु तर्हि विधेयविशेषणत्वमेव प्राशस्त्यस्य । ननु तस्य प्रयत्नविशेषानपेक्षस्य तदुपनेया स्तुतिरेव विधेयास्तु, प्राशस्त्येन स्वज्ञानस्योपस्थापनसम्भवात् ।

नचैवं विध्युद्देशत्वापात इति वाच्यम् । तस्य प्रयोजनत्वादितिचेत्, न; लक्षितलक्षणापत्तेः । प्राशस्त्योपस्थितिरेव श्रुतेरप्युपस्थितिः । स्वप्रकाशत्वात् ज्ञानस्येति चेत, न; तथाप्यर्थप्रवणतां हित्वा स्वप्रतारणताकल्पने गौरवापत्तेः ।

उच्यते । विधेयोपलक्षणतया प्राशस्त्योपनयः ।

ननूक्तलक्षणमन्यव्यवच्छेदकं (न) भवति । यथा क.मण्डलुना छात्रमानयेति छात्रान्तरं व्यवच्छिद्यते, न चात्र तदस्ति, अप्रशस्तस्य वायोर्व्यवच्छेदस्याभावात् । मैवम् । न व्यावर्तकमुपलक्षणत्वं विशेषणत्वम्, किन्तु कार्याङ्ग(गं) सत्सम्बद्धत्वं विशेषणं कार्यानङ्गम् । सम्बद्धं चोपलक्षणम्। व्यवच्छेदस्तु प्रयोजनमुभयोः, तदिह प्राशस्त्यस्य विधेयवाय्वादि सम्बन्धादुपलक्षणत्वमुक्तम् ।

न च प्रयोजनाभावो दोषः । न हि सर्वेण प्रयोजनवता भवितव्यम् । अस्ति तु तदिति सर्वत्रातिरेके परीहारः ।

न चैवमनुवादानामधिकस्यानुष्ठेयस्यानुपनेयत्वात् चोदनान्तर्निवेशो न स्यादिति वाच्यम् । सम्भूयकारित्वव्युत्पत्तेः । अनुवादं विना कार्यज्ञानस्यासम्भवात् । तस्यैवानुष्ठेयस्य प्रतिपादनात् । अत एवार्थवादानां प्रमाणकोटिपर्यवसायित्वमुच्यते । यद्यप्येतादृशं कार्यस्य स्वरूपे प्रमाणत्वं सर्वेषामेव विद्यते । तथापीतरेषामनुष्ठेयान्तरद्वारापि कार्ये व्यापार इति । न तथा व्यपदेशः ।

न च विध्युद्देशेऽनाकाङ्क्षितत्वात्, प्राशस्त्यस्य नान्वय इति वाच्यम्। रक्तपदवदाकाङ्क्षोपस्थापनसम्भवात् । यथापरपदं भवति । नैव निराकाङ्क्षं रक्तपदं पटमन्तरेण साकाङ्क्षमतस्तद्बलात् परस्यापि रक्ते आकाङ्क्षाकल्पनं तथात्रापि। न चात्र सम्भव एवाकाङ्क्षायाः। यथा हि पटस्य रक्तो गुणः,तथा प्राशस्त्यवाय्वादीनाम् । न च लाक्षणिकत्वादनुवादानां नाभिधानपर्यवसानम् । अतश्च कथमाकाङ्क्षेति वाच्यम्। यतः सर्वं लक्षणसाधारणत्वात्। तस्मादभिधानग्रहणमु-

पलक्षणस्तत्र तात्पर्यापर्यवसानं तु तत्र विवक्षितम्। यत्राकाङ्क्षा कल्पनेनान्विताभिधानमुभयाकाङ्क्षालक्षणत्वात् सम्बन्धस्य। तर्हि हविरुभयत्वेप्याकाङ्क्षा(क्ष)कल्पनमतः कथं तदविवक्षितमिति चेत्, न; विशेषणत्वमात्रेण हि तत्राकाङ्क्षाकल्पनं तूद्देश्य कोटिविशेषणत्वेनेत्यदोषः।

तत्र प्राशस्त्यं प्रतिपदमेव लक्ष्यते। अतो नद्यस्तु तप इति (?) केचित्। तदयुक्तम्। एकस्मिन्पदे स्तुतिबुद्धेरनुपपत्तेः। अपि चैवम्, प्रतिपदं विध्यन्वये रोदनादीनां विधेयत्वमेव किं न स्यात्। रुद्ररोदनं हि विधातुं न शक्यते। न तु रोदनमात्रम्। अपि चैवं क्रियाकारकभावेनान्वयः प्रतीयते, स भज्येत। तत्त्यागे वाक्यभेदतुल्यो दोषः स्यात्। तस्मात्सम्भूय प्राशस्त्यलक्षणा।

नन्वेवं विशकलितानां लक्षकत्वाभावात्, अनुवादानां परस्परान्वयः। स चान्विताभिधानेन। न चान्विताभिधानोत्तरकालीना लक्षणा भवति। वाक्यार्थप्रतिहेतुकत्वाल्लक्षणायाः। वाक्यैकवाक्यता चैवमनुवादविध्युद्देशयोः स्यात् स्वार्थबोधेऽपर्यवसानात्। अवान्तरव्यापारतया स्वान्वयावगतिः; अतः पदार्थप्रतीतिस्थानीयत्वादत्रोपदेशवाक्यतैवेति चेत्, न; सर्वत्र वाक्यैकवाक्यतोच्छेदप्रसङ्गात्। यत्र द्वयमेवान्विताभिधानं कार्यविषयम्। द्वयोश्च वाक्यार्थयोः परस्परान्वयः, तत्र वाक्यैकवाक्यता यथाधिकाराङ्गवाक्ययोः कार्याभिधानेन वाक्यपर्यवसानादिति चेत्, एवं तस्य कार्यार्थानामनुवादानामन्विताभिधानमेव कथं, कार्यान्विताभिधाननियमात्। तर्कातिसिद्धार्थानामन्वयावगतिस्ततो लक्षणेति चेत्, न; तर्कस्य प्रमाणान्तरप्रमेयतयोपस्थापकत्वात्। तस्मिंश्च प्रमाणान्तरा प्रतीतेः।

न च सा विशिष्टावगतिरेवमुक्ता। अयथावस्तुविषयत्वात्। न च तत्रापि लक्षणा, तथा सति तादृशेन विशिष्टेन प्राशस्त्यबुध्यभावात्।

उच्यते। प्रत्येकं पदार्थाः स्मर्यन्ते, तेषां च भेदाग्रहात्। विशिष्टैकार्यव्यवहारकारित्वं भ्रमतयाऽवभाति। तत्र भ्रमादभेदव्यवहारो जायते, तथा चात्राभेदज्ञानोचितं स्मरणम्। तस्यापि व्यवहारकोटित्वात्। तस्माद्रजतस्य रोदनप्रभवतया तद्दानं रोदनहेतुरिति भ्रमावगते तस्मान्मुत्कृष्टत्वस्मरणम्। ततोऽदानस्योत्कृष्टत्वं ततस्तदन्वितःवार्थो विध्युद्देशेनोच्यते।

एवमन्येषु निन्दानुवादेषु। प्रशंसार्थवादेषु तु न प्राशस्त्यमेव प्रथमं लक्ष्यते। तस्मात् भ्रमनिमित्ताल्लक्षणात्र व्युत्पाद्यते। यत्र विशिष्टोर्थः सत्य एव

तत्र भ्रमत्वं न भवति । किन्तु तत्रापि नान्विताभिधानम् । असत एव भेदस्याग्रहान्न भ्रमत्वम् । अत एव पठन्ति, सतो वाऽसतो वाऽर्थे न स्तुतिः कर्तव्येति ।

अन्ये त्वाहुः, न प्राशस्त्यान्वितः, स्वार्थो विध्युद्देशेनोच्यते, किन्त्वनुवादपदैरन्वितस्यैव प्राशस्त्यलक्षणा क्षिप्रा फलदातृत्वे वायोर्भ्रमादप्यवगते वायव्ययागस्य क्षिप्रफलसाधनतारूपप्राशस्त्यमनुमानाभासरूपात् स्मरणाद्भवति । तच्च, ज्ञानं लिङ्यत्कर्तव्यताभिधानमपूर्वस्य कार्यं तत्र दुःखमयकर्ममूलतया न (ते) यस्य प्रतिबन्धं वारयति । अतः प्रमाणकोटित्वमेव स्तुतेर्न त्वनुवादाः प्रमेयमन्विताभिधानेन निवेशयन्ति । अत एवैषामप्रयोजनत्वम् । अनतिप्रयोजनत्वं तु परिभावनेनैव प्रेक्षावतां प्रतिबन्धनिवृत्तेः । यदि सर्वथा निःप्रयोजनं स्यात्, ततः कथं लोके स्तुतिः स्यात् ।

न हि तत्रायं परिहारः, न वयं वेदकर्तार इति । विवरणे तु बाह्यहेतूत्थमप्रामाण्यं प्रथमपादे निरस्तम् । इदानीं तु वेदवाक्योत्थमेवाप्रामाण्यं निरस्यत इति पादभेदः । पादान्तरसङ्गतिश्च पूर्वपक्षः । हेतुसापेक्षकार्यप्रतिपादकत्वाल्लिङस्तादृशस्वभावावधारणात् । यत्रापि हेतुर्नास्ति तत्रापि साक्षेपमेव कार्यं प्रतिपाद्यमिति सकलवेदप्रामाण्याक्षेपः ।

न च स्तावकत्वेनान्वयः । तथापि हेतुत्वापरित्यागात् यस्मात्प्रशस्तोऽयं तस्मात्कर्तव्य इति तदाप्यन्वयः । शब्दान्तस्तु यत एव हेतुत्वे नान्वयकार्यस्य कार्यत्वं नास्ति, अत एव स्तावकत्वेनान्वये न स्तुतितः कार्यं, किन्तु स्तुतिकार्यत एव स्तुतिः । कार्यमेव ह्यभिधीयमानं स्वावगमापलिङ्गादिसहकारितया स्तुतिमपेक्षते । न तु प्राशस्त्यं कार्यावगमे लिङ्गमिति तदर्थंशास्त्रात् । मन्त्रेषु संशयः लोके उच्चारणमात्रेणोपकुर्वन्ति, उतार्थप्रकाशनेनेति ।

नन्वेवमसङ्गतिः स्यात् । उभयथापि देवनाप्रामाण्यात् । अवि(पि)चार्थित्वेन मन्त्राणामेव प्रामाण्यं न स्यादिति चेत्, किं तेन । तेषामदेशमारूपत्वात् । किञ्च, प्रयोगकाले अर्थप्रकाशत्वेऽपि न प्रामाण्यम् । न हि तत्कालीनं मन्त्रोच्चारणं शब्दोन्तेऽपि प्रमाणं तस्य, प्रमेयत्वात् । तत्कालीनस्य च प्रकाशनस्य यत्स्मरणरूपस्याप्रमाणत्वेन किञ्चित क्रियारूपत्वात् । तस्मात् सिद्धान्तेप्यध्ययनदशायामेव मन्त्राणां प्रामाण्यं, न तु प्रयोगदशायामपि । तत्र तस्याः क्रियायाः प्रयोगदशायां दृष्टत्वात् (दृष्टा वा ?) किञ्चित्क्रियान्तरत्वदृष्टत्वाद्वा, किं तु तस्याः प्रामाण्ये, अत एव

प्रयोगकालेऽननुपराणामपि हुमित्येवमादीनामध्ययने प्रामाण्यमेव । अन्यथा सर्ववेदाप्रमाण्यं स्यात् ।

कथं पुनरध्ययनदशायां मन्त्राणां प्रामाण्यम्? उच्यते, मन्त्रैरात्मैवोपनीयते । तदन्वितश्च स्वार्थे ग्राहकवाक्येन वोच्यते । अतो लाक्षणिकानामिव पदानामुपस्थापनद्वारा अन्वितप्रतीतौ व्यापारात्प्रामाण्यं प्रमेयं च । तत्र लक्षणया मन्त्रैरात्मोपनीयत इति केचित् ।

नन्वर्थान्तरे वृत्तिर्हि लक्षणा । सा च स्वार्थस्य पदार्थान्तरान्वययोग्यतया तद्योग्योपस्थापनरूपा । न चेहैकैकस्य पदस्यात्मा पदार्थान्तर(रा)न्वयगमनयोग्यः । न चानयोरयोग्यता मैवम् । अन्नयोस्तावदयोग्यत्वं विद्यते । स्वाध्यायकाले बर्हिर्लवणस्यावर्तमानस्य तत्तया प्रकाशनायोगात् । न च पदस्यात्मा पदार्थान्तरान्वययोग्योऽन्यत्रापि पदे स्वात्मन एवार्थत्वात् । पदयोश्च सम्भूय एकाङ्गत्वरूपस्यान्वयस्य सम्भवात् । तदेवं मन्त्रपदैः स्वे स्वे आत्मनि लक्षिते मन्त्रो लक्षितो भवति ।

अन्येतु लक्षणाद्युपस्थितेनैव परमन्विताभिधानं सम्भवत्येवं न, किन्तूपस्थितमात्रेणेति व्युत्पत्तिः । लक्षणादिकमपि ह्युपस्थितिरूपत्वादेरव्युत्पन्नम्, न तु प्रातस्विकेन रूपेण । ततश्च श्रोत्रप्रत्यक्षोपस्थित एव मन्त्रो ग्राहकेण गृह्यत इत्याहुः । न चैवं वृत्तितया तदन्तर्निवेशः । कथम् ? अन्विताभिधाने निवेशात् । अन्यथा हुमुच्चारयेदिति नान्वयप्रतीतिः स्यात् । तत्र स्वार्थाभावे लक्षणाऽभावात् । तस्मात्स्वाध्यायदशायामेव प्रामाण्यम् । तत्तु प्रयोगकालीनेन प्रकाशनेन दृष्टेनादृष्टेन वा निर्वाह्यते व्रीहिवाक्यप्रामाण्यमिव किञ्चित् क्रियया वैगुण्यलक्षणया । तदेव चोक्तं ग्रन्थे । तस्मात्कथमत्र सङ्गतिः? उच्यते। मन्त्रलिङ्गतदर्थशास्त्रयोः परस्परव्याघातादप्रामाण्ये शब्दस्वभावादप्रामाण्यमिति सकलदेशना प्रामाण्याक्षेपेणैव पूर्वपक्षः । तथाहि—यदि मन्त्राणामर्थपरता । तदा लिङ्गादेव विनियोगे सिद्धे तदर्थशास्त्रं निष्प्रयोजनं स्यात् इति तत्प्रयोजनवत्त्वा-(त्वा)य मन्त्रणामर्थपरत्वं नास्तीति प्रतीयते । तथा यदि तदर्थशास्त्रस्यार्थपरत्वं त्याज्यम् । अन्यथा निष्प्रयोजनत्वापत्तेः। ततः प्रतीतमन्त्रार्थपरतानुरोधेन तदर्थशास्त्रं न प्रमाणमिति प्रतिभाति । अतः परस्परव्याघातादप्रामाण्यम् । तदर्थशास्त्राद्विनियोगो लिङ्गवशात्तु प्रयोगकाले प्रकाशत्वम् । अतो द्वयोरेव सार्थकत्वमिति चेत्, न; प्रयोगकालीनमेव हि प्रकाशनसामर्थ्यं लिङ्गम् । तच्चेत्तु-

रस्कृतं विनियोगोऽपि तस्यैव स्यादिति कृतं तदर्थशास्त्रेण।तत्परिसङ्ख्याद्यर्थं भवतीति चेत्, न; परिसङ्ख्यादीनां दुष्टत्वात्।यत्र वा परिसङ्ख्यादिकं न भवति तदत्रोदाहरणं भविष्यति । तदर्थशास्त्रस्य श्रुतित्वेन दुर्बलं मन्त्रलिङ्गं बाध्यताम् । न तु व्याघात इति चेत्, न; श्रुतेर्हि प्रयोजनमात्रं न स्यात् । मन्त्रस्य दुर्बलस्यार्थपरत्वमेव भज्यत इति तुल्यमेव तथा, यथा शीघ्रभावित्वात् श्रुतेर्बलवत्त्वम्, तथा किञ्चित् क्रियार्थं लिङ्गापेक्षणात्, दुर्बलत्वमपीति चाहुः ।

राद्धान्तस्तु—न तदर्थशास्त्रस्य प्रयोजनत्वार्थं व्युत्पन्नं मन्त्राणामर्थपरत्वं हातव्यम् । प्रयोजनवत्त्वस्याव्युत्पन्नत्वात् । अतो व्याघातो न, लिङ्गमेव विनियोजकं तदर्थशास्त्रं त्वदर्थवाद एव । न तु श्रुतेः शीघ्रभावित्वात्, सैव (वापि) विनियोगिका युक्ता । तथा च मन्त्रस्य द्वाराकाङ्क्षायां प्रशस्तायां विनियोगज्ञानमेव जनयति । अन्यार्थशास्त्रनै(णै)व ऐन्द्र्यागार्हपत्यविनियुक्तायाम् । अतो न तदर्थशास्त्रमनुवादकं युक्तम् ।

अत्र विवेकः । लिङ्गमेवात्र शीघ्रभावित्रयाणामेव शेषशेषि, किञ्चित्क्रियाणामुपस्थापकत्वात् । श्रुतौ शेषशेषिणोर्द्वयोरुपस्थितिः, न किञ्चित् क्रियायाः । अतस्तदर्थं लिङ्गापेक्षा । ततो दुर्बलत्वमेव ।

न चैवमन्यार्थशास्त्रेऽपि श्रुतेर्दुर्बलत्वमेव स्यादिति वाच्यम्। तत्रैन्द्र्या गार्हपत्यमुपतिष्ठते इत्यात्मनेपदबलात्किञ्चित्क्रियाया अभिधानरूपाया उपस्थितेः। यद्यपि धान्यमसीति दृषदि तन्दुलः(ला) नावपतीति अन्यार्थशास्त्रे किञ्चित् क्रियाया उपस्थापनं नास्ति। लिङ्गादपि तन्दुलप्रकाशनापत्तेः। अतः स्वयं किञ्चित् क्रियामुपस्थाप्य निरपेक्षा श्रुतिरेव नियोजिका ।

तदयुक्तम् । यदि सम्भ्यसम्भृतसामग्रीकं लिङ्गं, तदा अन्यार्थशास्त्रेऽपि विनियोजकं स्यात् । श्रुतिरपि चेत्; एवं सति तुल्यत्वं स्यात् । न तु (नु) लिङ्गे दुर्बले द्वयोरपि सम्भृतयोः श्रुतिर्बलीयसीति चेत्, न; सम्भृतत्वातिरिक्तबलत्वाभावात् । भावे च तदर्थशास्त्रे श्रुतेः स्वाभाविकत्वं बलवत्त्वम्, लिङ्गस्य तु सम्भृतत्वमिति तुल्यबलवत्त्वाद् द्वयोर्विनियोजकत्वमिति स्यात् । न तु श्रुतेरनुवादकत्वम् । धान्यमसीत्यत्रापि च लिङ्गस्यैव सम्भृतसामग्रीकत्वविनियोजकत्वमग्रे स्यात् । तत्र श्रुतिलिङ्गानपेक्षेति चेत्, मा भवतु तदपेक्षा, तदापि सम्भृतत्वे को विशेषः? लिङ्गादप्राप्तौ तदनुसन्धायार्थान्तरात्; किञ्चित् क्रियार्थसन्धाने हेतो-

(र)पि विलम्बात्। तत्रापि गौणमेव लिङ्गमपेक्षते। कथमन्यथा तन्दुलप्रकाशनं किञ्चित् क्रिया स्यात्। गौणं लिङ्गमेव न स्यादिति चेत्,न; सामान्यमात्रं लिङ्गं न त्वभिधानशक्तिरेव वाक्यत्वमात्रपर्यालोचनया गौणत्वम्। प्रकाशनं क्रियतेऽत्रेति चेत्, न; अस्यापि लिङ्गत्वात्। तदर्थशास्त्रेऽपि च तथैव नियोजकत्वापत्तेः। अपि च पुरोडाशं प्रथयतीति द्वितीया किञ्चित् क्रियामभिधत्ते क्रियाजन्यफलभागित्वाभिधानात्। अतो द्वितीयाभिधायां सामान्यतः किञ्चित् क्रियामादाय विनियोगाभूते लिङ्गाद्विशेषाद्विनिगमकावगमो भवति। न तु लिङ्गं विना श्रुतिरपि विनियोजिका। अन्यथा व्रीहीनवहन्तीत्यत्रापि लिङ्गीको (लैङ्गिको) विनियोगो भवेत्। श्रुतिश्चानुवादिका स्यात्। प्रथमस्य न किञ्चित्क्रियां विभक्तिमाह न तु मन्त्रस्य च विनियोगश्चित्यत इति चेत्, न; एवं सत्यश्रौतत्वमसक्त ऐन्द्रि(द्री)विनियोगश्चैव श्रौतः स्यात्। अपि च उरु प्रथा उरु प्रथस्वेति, इतिशब्देन करणत्वाभिधानात्, तद्बलादेव किञ्चित् क्रियालाभः, अन्यथा स्मरेद्धस्तीत्यत्रापि लैङ्गिको विनियोगः स्यात्। लिङ्गात् किञ्चित् क्रियाविशेषावगमात्। अपि चैवं तदर्थशास्त्रस्यानुवादकत्वे लिङ्गाच्चाग्रे विनियोगे रशनायामश्वगर्दभरशनायामपि विनियोगः स्यात्, लिङ्गात् क्रियाविशेषावगमात्। अपिचैवं तदर्थशास्त्रास्यानुवादकत्वे लिङ्गाच्चाग्रे विनियोगः, श्रुतेस्तु विनियोजकत्वे लिङ्गं प्रवर्तत एवेति। न गर्दभे मन्त्रप्राप्तिः। किञ्च लिङ्गादिदमुपस्थितमित्यर्थवत्ता विनियोगो भवति। अनेनेदं कर्तव्यमिति शब्दाभावात्। अन्यथा ध्यानादीनामपि विनियोगः स्यात्। तत्रापि लिङ्गसद्भावात्। ग्राहकेदमर्थद्वारा ऐतदर्थ्यं विनाऽनुपपद्यमानं द्वारे प्रधाने श्रुतेस्तात्पर्यं कल्पयित्वा लिङ्गं सहायमादाय विनियोजकम्। कल्पना चान्यतः सिद्धविनियोजकप्रमाणाभावमुपलभ्य भवति। तत्र लोकव्युत्पत्तिसिद्धतात्पर्यायां श्रुतौ विद्यमानायां लिङ्गस्य सामर्थ्यमेव नास्ति। यस्त्वंशः श्रुतितोऽपि न सिध्यति, किञ्चित् क्रिया, तत्र लिङ्गात्तात्पर्यं कल्प्यते।

चन्द्रस्तु, श्रुतेः शीघ्रं विनियोगः प्रतीत एव। किन्तु द्वितीयोऽसौ न तार्तीयः, किञ्चित् क्रियाविरहात्। लिङ्गात् किञ्चित् क्रियापेक्षणे लिङ्गमेव शेषत्वबोधकं सम्वृत्तत्वात्। विप्रतिपत्तौ तु प्रथमोपजातत्वतार्तीयविनियोगविरोधादेव न लिङ्गं विनियोजकमिति। तत्र उक्तदोषात्। न च द्वितीयविनियोगो लिङ्गस्य श्रुतेर्विलम्बः, किन्तु तार्तीय एव, लिङ्गात् कर्तव्यतायाः प्रतीतेः।

न च प्रयोगविधितः कर्तव्यतामादाय लिङ्गस्य विनियोजकत्वम्, अन्यथाङ्गविधीनामनुवादकत्वासम्भवात् इति, युक्तम् । अङ्गमत्प्रयोगवपने न गृह्यते (?)। तत्राहितमङ्गं भवतीत्यभिधानात् । चरमस्तु प्रयोगविधित एव साङ्गप्रधानकर्तव्यतावगमात् । अङ्गवाक्यीयकर्तव्यतावगमः फलतोनुवादो भवतीत्येवं सङ्गस्य विधिरनुवादो भवतीत्युच्यते । न च द्वैतीयो विनियोगः । तार्चीयस्य विरोधिस्वरूपाश्रयत्वात् । सत्यपि मन्त्राणां तार्चीयविनियोगे ध्यानादिनापि द्वैतीयविनियोगानपायात् ।

नन्दनस्तु, विधेस्त्रिकालाप्राप्तविषयत्वात् , । तदनुशास्त्रस्य विलम्बिन्यामपि लिङ्गात्प्राप्तौ सम्भवत्यां विनियोजकत्वम् । अन्यार्थशास्त्रे तु तद्विपयाभाविन्यपि प्राप्तिर्नास्तीति विनियोजकत्वमेव । यत्र तु निमित्तेतर भाविनी प्राप्तिः, तत्र नानुवादत्वम्, न निमित्तं विधिरपबाधत इति न्यायात् । यथा वैष्णवस्त्रिकपाल इत्यत्र विष्णुविधानादेव देशना लिङ्गादतिदेशेन विष्णोः प्राप्तिः न त्वन्यथेतीदमुक्तम्। अवश्यंभाविनी हि प्राप्तिर्विधित्वं हन्ति। इह तु श्रौतेः विनियोगे जाते ग्राहकमन्त्रयोर्निराकाङ्क्षाल्लैङ्गिको विनियोगो नास्ति । अन्यथोपादानादेवावान्तरापूर्वाणां प्राप्तिसम्भवाल्लिङ्गानुवादकत्वमेव स्यात् ।

किञ्च भाविन्यामपि प्राप्तौ कुतः पूर्वास्यानुवादकत्वम्, उदितस्य वादोनुवादो, न तु भाववादस्य अर्थः, न परं शास्त्रम् । यद्यनुष्ठानविशेषस्तदेव विधित्वं भाविन्यामपि प्राप्तौ नानुष्ठाने विशेष इति चेत्, न; नहि प्रयोजनविधित्वम्। किन्तु प्रवर्तकत्वम्। तच्च विधित एवात्र द्वयोरेवाग्रे सत्त्वरमभाविनोः प्रवर्तकत्वात्। अन्यथा भाविन्यपि प्राप्तिः कथं विधिरूपा? किं कालाप्राप्तगौवरत्वाद्विधेः। शब्दधर्मोऽयं विधित्वम्,अनुवादत्वं वा? न च लिङ्गशब्द इति चेत्,न;अनुवाद इत्यत्र वदेर्ज्ञन(ज्ञान)मात्रस्य विवक्षितत्वात्। लैङ्गिकस्यापि ज्ञानस्य शब्दजन्यत्वादनुवादकत्वम्। यदि भाविन्यां प्राप्तौ नानुवादः, तर्हि कथं पृषदाज्येनान्वयान् जनयतीत्यन्वयानुवाद इति चेत्, न; विशिष्टविधौ गौरवभयादतिदेशस्यातिदेशो चरकालमभिधानात्। अपि चैवं गर्दभेऽपि मन्त्रप्राप्तिः स्यात्, लिङ्गमेवाग्रेसरम्, ग्राहकदशायामेव मन्त्रोऽयं शक्तस्तद्वारेणास्य विनियोगप्राप्तिरन्वयप्रतीतिः, प्राप्तिलिङ्ग(गा)दुपसंहार इति चेत्; न, तस्यां दशायां सामान्यतो द्वारेदमर्ध्यप्रतीतेः । प्रतीतौ वा यदस्य प्रमाणेनोपनेतव्यम्, तदस्य द्वारमिति प्रतीतेः । प्रथमं श्रौत एवोपसंहारो युक्तो न तु लैङ्गिकः।

अपि चैवमन्यार्थशास्त्रे लिङ्गादुपसंहारः स्यात्। अन्ये तु तदर्थशास्त्रेण यजु-(जू)रूपस्य मन्त्रस्य परिमाणावधारणाय लिङ्गमपेक्षणीयम्। अतोत्र लिङ्गमेव बलीयः। ऐन्द्या तु ऋषिच्छन्दोवशादेव परिणामावधारणमिति न तत्र लिङ्गापेक्षेत्याहुः, तन्न; सफ(क)लतदर्थशास्त्राध्यापनात्। धान्यमस्यादौ च यजु(जू)रूपतया लिङ्गस्य बलवत्त्वापत्तेः।

न च लिङ्गमपेक्षत इत्येतावता बलीयो भवति। न हि तस्य विनियोग-(ज)कत्वमपेक्ष्यम्, किन्त्वेकवाक्यत्वावधारकत्वम्। न चैतावता तदेव नियोजकं शीघ्रम्। न हितस्य स्वरूपविलम्बेन प्रतीयत इति केनचिदुक्तम्। श्रुतिसमकालमेव प्रतिपन्नं स्वरूपं न श्रुत्या सह समकालविनियोगाय समर्थकल्पनामेकं हि तत्। कल्पना दृष्टश्रुताभ्यामनुपपत्तेरनुपशमे भवति। यावच्छ्रौतविनियोगाभावं नावधारयति तावत्कथं प्रवर्तते। श्रुतेस्तु नेयं सामग्रीति विशेषः।

उच्यते, न हि प्रतिमन्त्रं लैङ्गिको विनियोगः कल्प्यते। किन्तु सर्वानेव मन्त्रान् ग्राहकगृहीतानवलोक्य यो यत्प्रकाशकं तत्तेन प्रकाशयेदिति विनियोगः कल्प्यत इति साव(र्व)सामान्यकल्पना तदर्थशास्त्रेणापि व्याप्नोति तत्परित्यागा(ग)-कारणाभावात्। तस्य श्रुत्यैव नैराकाङ्क्षा तत्परित्याग इति चेत्, न; उक्तं सामान्याकाङ्क्षायां तत् कल्पनं न तु विशेषतस्तत्तदर्थम्। न च तथापि तत्परित्यागेन तत्कल्पनं विशेषकल्पनायां गौरवापत्तेः। तत्र द्वयोर्विज्ञानयोर्विधित्वासम्भवात्। तदर्थशास्त्रमेवानुवादकं भविष्यति। लैङ्गिकस्य बहुविषयस्यांशतो अनुवादकत्वे वैरूप्यप्रसङ्गात्, तस्मादेतदर्थं शास्त्रविलम्बेनैवानुबोधकम्। न त्वेवमन्यार्थशास्त्रं विलम्बिनैवानुबोधकम्।

नन्वेवमन्यार्थशास्त्रेऽपि लैङ्गिको विनियोगः स्यात्। स तत्र च बलाबलत्वाबाधात्। इह विरोधाभावादेव न बाधः। बलाबलेऽपि श्रुतेरत्र लैङ्गिकसामान्यविषयज्ञानस्य दुर्निवारकत्वात्। न प्रथमं श्रुतिर्विज्ञानं जनयति, किन्तु स्वयमेव विलम्बमालम्बते।

न चैवं गर्दभेऽपि मन्त्रप्राप्तिः स्यादिति वाच्यम्,। तत्र श्रुतेः सप्रयोजनत्वानुरोधेन साधारण्यस्य लिङ्गविनियोगस्य रसनेतरविषयतामापाद्य गर्दभप्राप्त्यसम्भावनया अश्वरशनायां श्रौत एव विनियोगः। तत्र तु विधित्वेऽपि निष्प्रयोजनत्वलिङ्गादपि तन्मात्र एव मन्त्रप्राप्तिः। तत्र निष्प्रयोजनत्वविशेषादनुवादत्वमेव। न तु साधारणस्य लैङ्गिकस्य विनियोगस्य सङ्कोचः।

विवरणे तु, योगमन्त्राणामप्यर्थपरत्वेऽव्यापित्वेनार्थपरत्वं हित्वा अध्ययन विधिना स्वाध्यायस्य प्रयोजनान्तरपरिग्रहादनर्थपरः स्वाध्यायः। तथाचाध्ययनविधेरध्ययनार्थपरत्वम्,तस्य चानर्थपरत्वेनैव व्युत्पन्नस्यानर्थपरत्वैकप्रयोजनान्तरकल्पनम्, ततः पुनरर्थपरत्वं हित्वाऽध्ययनविधिना स्वाध्यायस्यानर्थपरत्वमिति चक्रकादप्रामाण्यम्। अयोग्यादीनां तु जयमन्त्रस्यानर्थपरत्वेनैव व्युत्पन्नस्यानर्थपरत्वेऽपि नाव्यापिता सिद्धान्तेऽध्ययनं तत्रापि चक्रकं स्यादिति पूर्वः पक्षः।

राद्धान्तस्तु निबन्धनोक्त एव। धर्मस्य शब्दमूलत्वादशब्दमनपेक्षं स्यात्। मन्वादिस्मृतीनां किं भ्रान्त्यादिकं मूलं किं वा वेद इति चिन्ता पूर्वपक्षे स्मृतीनामप्रामाण्यात्। तदेकवाक्यतापन्नानां मन्त्राणामप्रमाण्यमिति शब्दस्य भावादेवाप्रामाण्यम्। एवं च सकलदेशनाप्रामाण्याक्षेपात् सङ्गतिः।

ननु यां(या)जना मन्त्रस्य नाष्टकास्मृत्यैकवाक्यता, तत्र प्रयोगे प्रमाणाभावात्। लिङ्गं विनियोजकमिति चेत्, सामान्यसम्बन्धाभावात्, अव्यभिचरितक्रतुसम्बन्धदेवतामुखेन ग्राहकग्रहणात्। पंतुतादीनामिव सामान्यसम्बन्ध इति चेत्, न; एवं काम्येऽपि याज्यानुवाक्याकाण्डे तथा प्रसक्तेः लिङ्गस्य क्वापि सामान्यसम्बन्धापेक्षा समाख्यादितो न स्यात्। अभिधेयस्यार्थस्याव्यभिचारेणाग्राहकग्रहणम्। न च मन्त्रेण स्वाध्यायदशायामर्थोऽभिधीयते स्वपरत्वात्। न च प्रयोगदशायां ग्राहकग्रहणं तस्य तदुत्तरत्वात्।

यत्तु दूषणं न मन्त्रवाक्ये ग्राहकग्रहणं मन्त्रस्यानभिधायकत्वात्। नापि प्रधानवाक्ये, तत्र मन्त्रासन्निधेः। तदयुक्तम्, मन्त्रस्य समाख्ययाऽपि सामान्यसम्बन्धाप्रसक्तेः। समाख्याबलात्तत्र प्रधानवाक्य एव सन्निधिकल्पनेति चेत्,न; इहाप्यव्यभिचारबलात् सामान्यसम्बन्धः, सर्वत्रैवं प्रसक्तेः। उपस्थितश्चार्थोऽध्ययनविधिनास्वीक्रियते। न तु तद्बलादेव तत् कल्पनम्। अत एव प्रजापतिव्रतपूर्वपक्षभावं विनापि प्रकरणादिकक्रतुसम्बन्धो मन्त्रस्य कल्पतामिति निरस्तम्। सर्वत्रैवं प्रसक्तेः। अभिहितनिर्वाहार्थं सा कल्पना न चेहाभिधानमस्ति।

विवेकचन्द्राद्री तु माभूतां ग्राहणविनियोगौ तथाप्यष्टकाकार्यौ ये त्रि (त्रि) देवता प्रकाशकतयाऽनुवादानामिव तत्सापेक्षतया न प्रामाण्यमित्याहतुः। तदयुक्तम्। न तावत् स्वाध्यायकाले प्रकाशत्वं स्वपरत्वात्। न चाप्रयोगकाले प्रयोगस्य विनियोगाधीनत्वात्। प्रयोगकाले चाप्रामाण्यं सिद्धान्तिनोऽप्यनुमतम्।

यच्च अनभूम्यादिमन्त्रस्य पाक्षिकी प्राप्तिरपकारतयोच्यते, तन्न; न तयाऽप्रामाण्यं भवति, तत्प्रयोगस्य पुरुषेच्छाधीनप्रयोगत्वेन वेदाननुमतत्वात्। अन्यथा सिद्धान्तेऽपि बौद्धादिभिः स्वातन्त्र्येण स्वप्रक्रियायां वैदिकमन्त्रप्रयोक्तवेदो न प्रमाणं प्रयात् ।

उच्यते । नैवं पूर्वपक्षे बोध्यम्। सिद्धान्ये(न्ते)प्यस्य मन्त्रस्याष्टकायां विनियोगाङ्गीकारात्। अन्यथा लिङ्गदर्शनस्यानुपपत्तेः । तस्माद्व्याप्यकद्वचनादष्टकासम्बन्धोचिता समाख्यास्तीति कल्प्यते । सा च याज्यानुरूपा। एवं ह्यष्टकासम्बन्ध एव। तत्रैव देवताप्रकाशनेन याज्यात्वोपपत्तेः। अन्यथा निशीष्टिसम्बन्धोऽपि स्यात् ।

अन्ये तु यथाष्टकादिविधेयस्मृतिवाक्यं तथा मन्त्रोऽपि स्मृत्यैव तत्र विनियुज्यते । यथाञ्जलिनोत्तरया अपूपान् जुहोतीति ह्यापस्तम्बस्मृतिः । श्राद्धादौ च स्मार्ते कर्मणि बहूनां मन्त्राणामेव स्मृत्या विनियोगात्। सामान्यसम्बन्धमात्रं वा गौरवभीत्या स्मृत्या बोध्यते । विनियोगस्तत्र लैङ्गिक एवानूद्यते। तदर्थशास्त्रवशात्। अत एव न निशीष्टिसम्बन्धः। अत एवास्तोमादौ मन्त्राम्ना(णां) विनियोगो नैव, चरितार्थत्वात्। प्रकरणाद्यनुरोधाभावाच्च किं विनियोगेनेति निरस्तम्।

नन्दनस्तु, सानो अस्तु सुमङ्गलीति फलाशंसनप्रतीतेः, अन्यत्रानुवादे देवतायाः फलदातृत्वेन कीर्तनात्, देवतात्वमेमात्र उन्नीयते, भवति ह्यनुवादस्वरसान्निर्णयो यथा द्वयोः प्रणयन्तीत्यत्र द्वाभ्यामेतीति तस्मान्न निशीष्टि सम्बन्धः ।

विवेकस्तु, कालपरत्वे मन्त्रस्य दृष्टार्थत्वं स्यात्। तस्माद्देवतापरत्वम्। कालो हि देवताप्रयोगाधिकारसिध्यर्थं स्मर्तव्यः । प्रवृत्तस्यार्थपरत्वानुविष्ट्यतो न कालाभावशङ्का । पदार्था अपि यथा ये प्रयोगादौ बुद्धिस्थास्तदनुष्ठानशक्त्यवगमेनाधिकारात् । तथाप्यस्मिन्समयेऽनुष्ठातव्या इत्येतदर्थस्मरणमपेक्षितमेव तेषाम्, अत एव पार्वणहोमे कालाभाज्यापक्षे नाश्रयित्वम्। देवता च प्रधानप्रत्यासन्ना, कालस्तु प्रयोगाङ्गतया व्यवहित इति देवतायामेव विनियोगः । बुद्धिद्वारेणैव देवता व्याप्रियते। कालस्तु स्वरूपेणेति बोधकस्य मन्त्रस्य देवतायामेवान्वयः।

केचि भवतूभयता(तो)विनियोगः। तथाप्यप्रामाण्यमित्याहुः।

ननु प्रामाण्यरक्षणाय न स्मृतौ विनियोगः । तद्वरमस्वारसिकोऽपि विशिष्ट एव विनियोगोऽस्तु । यागान्तरं वा मन्त्रबलाद्विनियोगार्थं कल्प्यताम् । देवतामन्त्रशून्ये वा विनियोगः कल्प(ल्प्य)ताम् । तद्बलादेव मन्त्रवर्तिनी देवता भविष्यति । मैवम् । न खलु प्रामाण्यं व्युत्पन्नम् । न च केनापि न्यायेन साधितम्, प्रथमाध्यायस्यासमाप्तत्वात् । येनैतकल्पनापेक्षतया पक्षाः स्वीकर्तव्याः ।

ननु पौरुषेयेन(ण) वाक्येन कथमपौरुषेयस्य मन्त्रस्यैकवाक्यमिति । तद्बलाद्वाक्यहेतूपबृंहणात् ।

अप्रामाण्याद्वेदस्यापि पौरुषेयत्वमिति केचित् ।

अन्ये तु नित्यानित्यसंयोगविरोधात् खलु पौरुषेयवेदवाक्ययोः नैकवाक्यत्वम् ।

अत्र तु पौरुषेयत्वेऽपि स्मृतिपरम्परया अनादित्वात् न नित्यानित्यसंयोगदोषः । सकलकालीनस्मृतिसाधारणस्याष्टकाकार्यवाचित्वस्य पुरस्कृतत्वात् ।

नन्वेवं सिद्धान्तेऽपि श्रुतिविरुद्धाप्रमाणीभूतस्मृत्येकवाक्यतया वेदस्य प्रामाण्यं न स्यात् । मैवम् । सिद्धान्तेऽपि तस्यालोभादिप्रभवाचारमूलत्वादिदं प्रथमतया नैकवाक्यत्वम् । पूर्वपक्षो नैतावतांशेन विहितानामन्वादीनां तथा मूलं(ल)त्वं युक्तमिति स्मृतिपरम्परैवेयम् । येषां तु सिद्धान्तेविरोधाधिकरणे अर्थद्वारव भ्रान्तेर्निमितम् । तेनात्र इदं बोधं दुष्पारे हरम् । एवं धनुनीव प्रपामीत्यर्थवादः । प्रपापेक्षि(क्षि)तत्वादप्रमाणम् ।

ननु दूरस्थायाः स्मृतेर्नानुवादो युज्यते । यदेकवाक्यतया हि तस्यान्वयो व्यवधाने च न स्यात् । सत्यम् । अन्यस्यैव विधेरयमर्थवादः । किन्तु प्रपानुवादतया स्मृत्या सहवाक्यैकवाक्यतापन्न एव । एवं दर्शपौर्णमासादिविधिरपि स्मार्तानुमानाद्यपेक्ष इति त्रिविधस्य वेदस्याप्रामाण्यमिति ।

पूर्वपिक्षस्तु न स्मृतीनां वेदमूलत्वं युक्तम् । वेदस्यानुपलम्भात् । न चोच्छं (च्छि)न्ना शाखामूलम् । शाखोच्छेदसम्भवक्रमेण सर्वशाखोच्छेदप्रसङ्गात् । यथा प्रत्यक्षाया अभियुक्तैर्मेधाबलशालिभिरभिधीयमानाया उच्छेदो न सम्भाव्यते । अतथा तस्या अपि कथम् ?

यत्तु दूषणं शाखोच्छेदसम्भवे पठ्यमानायामपि शाखायां यद (द्) वर्णा-

रुच्छेदशङ्कया सङ्गतिः स्यादिति, तददूषणम्, न हि पौरुषेयेषु चेद्धष्वु (?) कस्यचिदुच्छेदो भवति। एतावता सर्वेष्वपि पौरुषेयेषु ग्रन्थेषु पदवर्णोच्छेदाशङ्कयाऽनाश्वासो भवति। तस्मादसम्भावितश्चेच्छाखोच्छेदः सम्भवति, ततः पदवर्णोच्छेदोऽपि सम्भवेत्।

अथ पठ्यमानशाखागतान्येव वाक्यानि मूलम्। तानि तु नानाशाखागतत्वान्नानाप्रकरणस्थत्वाच्चास्मदादिस्तदर्थत्वेन नाकलय्यन्ते, अतिशयिततया ज्ञानशालिभिस्तु मन्वादिभिस्तेषामाकलनम्। स (न) चार्वाचीनेभ्यो मन्वादीनामतिशयितत्वे कश्चित् विप्रतिपद्यते इत्युच्यते, तन्न; एतावतो वैदिकाहृतकर्मणो बहुतरस्य स्मार्तकर्मराशेः प्रतिपादको वेदः प्रच्छन्न इति युक्ति विरोधात्। यदि च प्रत्यक्षवेदमूलैव स्मृतिः स्यात्, ततस्तैरेव कानि च कर्माणि स्मार्तानि कानि च श्रौतानि इति न व्यपदिश्यन्ते। व्यपदिशन्ति च स्मर्तारः कर्म स्मार्तम्, विवाहाग्नौ श्रौतं वैतानिकाग्निरिति तथैकाश्रम्यस्त्वं चार्याः प्रत्यक्षवेदमूलकत्वाद् गार्हस्थे इति गौतमवचनम्। स्मार्तानामपि प्रव्रज्यादीनां प्रत्यक्षवेदमूलकत्वेन घटते।

न च मन्त्रार्थानुवादमूलकत्वं स्मृतीनां युज्यते, तयोरपि विधायकत्वात्। यां जनेति मन्त्रानुपपत्त्या रात्रिदेवताककर्मकल्पना स्यात्। न त्वष्टकाकार्यस्य तास्ता इतिकर्तव्यताः। सर्वप्रयोगविधिमूलकत्वं मानवादीनां युज्यते। प्रयोगविधेर्विनियोगासामर्थ्यात्। न चैवं स्मृतिपरम्परेयं प्रमाणम्। अन्धपरा तुल्यत्वात्। तस्मादनादिरेवायं व्यामोह इति।

राद्धान्तस्तु। यद्यपि प्रत्यक्षो वेदो योग्यानुपलब्धिनिराकृतः। तथापि नित्यानुमेयो वेदो मूलं भविष्यति।

किं पुनर्वेदानुमाने लिङ्गम्। न तावत्स्मृतित्वमात्रम्, बौद्धादिस्मृतिभिर्व्यभिचारात्। नापि मन्वादिस्मृतित्वम्, बाधितस्मृतिभिर्व्यभिचारात्। उच्यते। परिशेषानुमानमिदं वाक्यं हि पञ्चान्यतमकारणकमिदं भ्रान्त्यादिज्ञानं चेति पञ्चकारणानि, तदिह महाजनपरिग्रहेण चतुष्टयं निरस्तम्। पारिशेष्यात् ज्ञानमवशिष्टम्। न चात्र नैकान्तकोद्भावनमर्हति। शेषाजनस्वस्य विज्ञानजन्यत्वाव्यभिचारात्। ज्ञानमपि चात्र न शास्त्रातिरिक्तं सम्भाव्यते। विनियोगस्य प्रमाणान्तरावेद्यत्वात्। न च वेदस्याप्यसम्भावना। वेदार्थानुष्ठाने (न) कर्तॄणामेव स्मरणात्। स्वयं च वेदमूलार्थज्ञानत्वात्। अत एव शाक्यादिस्मृतीनां न

वेदमूलत्वम् तेषामनङ्गीकृतवेदप्रामाण्यात् । स्वयं च योगिप्रत्यक्षमूलोपन्यासात् । न च तदनुवादमात्र एव । नित्यानुमेयवेदमूलैव सापि स्मृतिपरम्परेति वाच्यम् । विच्छेदस्मरणात् । उच्छिन्नेयं खलु काश्यपबुद्धिप्रणीतेषु प्रवचनेषु वार्तामात्रस्थितेषु सिद्धार्थेषु स्वयं प्रत्यक्षाद्धर्ममुपलभ्य प्रवचनानि प्रणीतानि हि इति ते स्मरन्ति । अत एव वेदार्थामिश्राणामपि स्मृतीनां चतुर्दशधर्मशास्त्रबहिर्भूतानामप्रामाण्यमेव । साङ्ख्ययोगे (ग) पाशुपतपञ्चरात्राणां चतुर्षु वेदेषु यन्नोक्तमित्येवं स्मरणात् । यदेव तत्र पुराणादिसंवादि तदेवादरणीयम् । नन्वेवं स्मृतिलक्षणात् कार्यान्मन्वादीनां ज्ञानानुमानात् अर्थोऽपि नियोगात्मा तस्मादेवानुमानात् सिद्धो ज्ञानस्यार्थनिरूपणीयत्वात् किं वेदानुमानेन ?

तत्र केचिदाहुः—अष्टकाकार्यविषयं ज्ञानमनुमातुमुद्यत एव पुमांस्तस्य कारणासद्भावे शशशृङ्गविदारितत्वमिव भुवो नानुमातुं शक्नोति । अतो असम्भावनापरिहाराय प्रथमं वेदमेवानुमिनोति, तन्न; वेदेन सहज्ञानमनन्तर्भाव्य कार्यकारणभावाभावात् । न स्मृतौ स्वतो वेदानुमानं युज्यते । न च कारणाभावेन कार्यन्नानुमीयते कार्यस्यैव प्रमितस्य कारणकल्पकत्वात् । न चात्रासम्भावना वेदस्य । शशशृङ्गतुल्यत्वाभावात् ।

विवेकस्तु, इतरलौकिकवाक्यमर्यादया स्मृतिवाक्याद्दानुमानिक्यर्थधीर्जातैव । सा जातापि वेदमन्तरेण बाध्यमाना वेदानुमानेन स्थाप्यते । एवं चरमं वेदोऽपि तमर्थं बोधयति शक्तत्वात् । न चैवं लौकिकवाक्यवदनुवादकत्वं स्यादिति वाच्यम्, अनुवादकत्वेऽपि साक्षेपत्वविरहादैवात् खल्वयमनुवादः पूर्वं वेदाभ्यां ज्ञानात् । न तु लौकिकवाक्यमिव ज्ञातोऽप्ययं प्रतिपादकत्वायापरमपेक्षत इति, तन्न, यदि ज्ञातार्थधीः, कथं सा बाध्यमाना विपरीतार्थोपदर्शकप्रमाणाभावात् । कारणीभूतवेदाभावादिति चेत्, न; नहि तस्या बुद्धेर्वेदः कारणं लिङ्गजातत्वात् । वेदवेद्यत्वं हि तत् कार्यमिति चेत्, एवं तर्हि तत्रानुमानमेव न स्यात् । आनुमानिकत्वेऽपि वेदवेद्यत्वेनापि तस्य भवितव्यं इति चेत्, कुत एतत् ? कथं हि स्मृतिप्रणयनमिति चेत्, न; अस्मदादीनामिव स्मृतिकाराणामप्यनुमानादेवार्थधीसम्भवात् । अपि चैवं कार्यस्यानुमानगम्यत्वादपूर्वत्वं भ(ज्यते) ज्येत । उच्यते । स्मृत्यर्थज्ञानमनुमीयते नत्वर्थः । कार्येण हि कारणमनुमेयम् । न स्मृतिवाक्यार्थः कारणम् । किं तु ज्ञानमेव । अर्थस्य

भाविनः कारणत्वापत्तेः अनुनिरूपणीयत्वात् । कथं विज्ञानस्य (स्या) कथमर्थंविना अनुमानमिति चेत्, न; (सत्यम्) अर्थोपस्थितिमन्तरेण न ज्ञानमतोनुमानम् । न त्वनुमेयत्वेनार्थोपस्थितिः। तस्मात्तर्कोपस्थितार्थविषयज्ञानमनुमेयम् ।

नन्वेवं पुंवाक्येपि नानुमानिकोर्थः स्यादिति । सत्यम् । न प्रथमेनुमाने किन्तु चरमं ज्ञाने नैवानुमीयते। एवं तर्हि इहाप्यनुमितानुमानादेवार्थः सेत्स्यति।

तत्र केचिदाहुः, इह ज्ञानानुमानसमुच्चये वेदोऽप्यन्तर्भूतः, एवं वेदजन्यतयैव ज्ञानस्य स्मृतिकारणत्वेन वेदस्यापि कारणकोटित्वात् । तथा च वेदादेव सम्भृतसामग्रीकादर्थज्ञानं जायते नानुमानात् । तस्य व्याप्त्यादिस्मरणे सापेक्षतया विलम्बितत्वात् ॥

तदयुक्तम्, विलम्बेऽपि वेदार्थस्यापूर्वत्वव्याहतेस्तुल्यत्वात् । यथानुमानं व्याप्त्याद्यपेक्षं तथा शास्त्रं व्युत्पत्त्यपेक्षमिति को विशेषः । किं चास्मदादीनामिव मनोरथेनैव करणेनानुमानादेव नियोगधीसम्भवात्। न वेदजमेव ज्ञानमनुमीयते।

अन्ये तु अनुमीयमानोप्यर्थः शास्त्रविषयतयैवानुमीयते । तथा च न तदनुमानं तत्र प्रमाणं सापेक्षत्वादित्याहुः । तन्न । एवं हि लौकिकवाक्ये यदा वक्तुः प्रत्यक्षं ज्ञानमनुमीयते तदा तस्यार्थेन सह विषयविषयिभावस्येव कार्यकारणभावस्यापि सम्भवात् कारणत्वेनैवार्थोनुमीयते । न तु विषयत्वेन । अतो ज्ञानान्तरविषयतया अर्थाग्रहणात्तदनुमानं तत्र प्रमाणमेव । यदापि वक्तुरनुमानज्ञानं तदापि तेन कारणीभूतं लिङ्गं ज्ञेयम्। लिङ्गेन चार्थं इति कुतः सापेक्षत्वम् ? इह तु मन्वादिज्ञानेन सह वेदार्थस्य विषयविषयिभाव एव परं सम्बद्ध इति तथैवानुमानादप्रामाण्यमेव । अतो वेदार्थधीर्वेदप्रमाणिका भवति च कार्यस्यापूर्वत्वार्थमिति ।

ननु नित्यानुमेयो वेदो न सम्भवति । उच्चारणं विना वेदत्वाभावात् । तत्र केचिदाहुः, नोच्चारणाद्वेदत्वम् । अपौरुषेयं हि वाक्यं वेदः । न चोच्चारणमन्तरेण वेदो वाक्यमेव न भवति । वाक्यं ह्युच्चार्यते । न तूच्चारणात्पूर्वं वाक्यत्वमेव नास्ति । कुतो हि श्लोकश्चरमं पठ्यते । उच्चारणाधीनेवाक्यत्वे कदापि न वाक्यत्वं स्यात् । एकस्मिन्काले वाक्योच्चारणयोरभावात् । तस्मात् तावानस्य प्रत्यक्षेण वेदेन सह विशेषपदस्याध्ययनविधिवत्वादुच्चार्यते । नित्यानुमेयस्य तु वेदस्य स्वाध्यायपदवाच्यत्वाभावात् नोच्चारणम् । तस्मात् प्रतिपदि यथा स्वाध्यायास्तथासौ सदेति, तन्न; अथ(र्थ)प्रत्यायनसमर्थस्य रव(?)त्वनुमानं वाच्यम्, न त्विदानीमेव सामर्थ्यमप्यनुमेयम् । तथा सति किं शब्दानुमानेन । अन्यदेव किमिति

तदर्थप्रत्यायनसमर्थतया आकाशादिनानुमीयते । आनुपूर्वा(र्वी)शालिनां च वर्णानां शक्तिरनवधारितेति तादृशा एवानुमेयाः । न चोच्चारणमन्तरेणानुपूर्वी-सम्भवः । तत् कथमनुच्चरितस्य वेदत्वम् । नानालौकिकवाक्यगतानामेव पदानां सम्भूयकारितयानुमानमिति चेत्, न; तेषामन्यपराणामन्यत्र सम्भूयकारित्वस्य प्रमाणान्तरविरोधात् । कुतः श्लोकः, पठ्यत इत्यस्यायमर्थः । एनया आनुपूर्व्या मया पठनीयानीति बुद्धिस्थानां पाठः । न च प्रतिपदि स्वाध्यायो विद्यते । न चैवमनित्यत्वं स्वाध्यायस्य स्यादिति वाच्यम् । न स्वाकाशस्येवास्य नित्यानित्यत्वम् । किं तर्हि, स्वतन्त्रपुरुषाप्रणीतत्वं सर्वथानुच्छेदश्च । यथा च क्षणप्रचयात्मिका क्रिया एकस्मिन्नपि च सम्पूर्णा विद्यते, तथा वाक्यमपि वर्णानुपूर्वीसामान्यतोर्थप्रत्यायनानुकूलतयानुमीयत एव । पदानुपूर्वी तु सामान्यतोपि नेति चेत्, न, मेयं (य) वर्णानुपूर्वी यदि कदाचिदपि नास्ति चेत् कथमुच्चारणं विनापि कथंचिदन्येन प्रकारेणेति चेत् तदेव तर्हि पदानुपूर्व्यामस्त्विति कुतोहि श्लोकश्चरमं पठ्यत इत्याद्युपन्यासेन किम् । अपि चैवं विधिबलादस्य पाठो मा भवतु । रागादेव त्वस्यार्थप्रत्यायनार्थं किमिति पाठं न कुर्वते लिप्यनुमितस्येव शब्दस्य । तथा च नित्यानुमेयत्वव्याघातः ।

अन्ये तु, स्मृत्यारूढानां वर्णानां परशदानां च तदर्थपरत्वमनुमीयते, तात्पर्यं च तत्प्रयोजनकस्मृतिरूपव्यापारे च यद्यपि स्मृतिविषयत्वं तस्य स्वप्रकाशमेव, तथापि स्मृतेस्तत्प्रयोजनकत्वमनुमेयम्, न चैवमानुपूर्वीशून्यत्वम्, स्मृतिबलादानुपूर्वीसिद्धेः । तन्न । तात्पर्यं हि तदुद्देशप्रवृत्तकृतिव्याप्यत्वरूपं शेषत्वम् । तच्च नाम(मान)स(सं)प्रत्यक्षमेव । न हि प्रयोजकत्वं कृतिस्वरूपादन्यत् । यथा हि विषयत्वं कृतिस्वरूपादन्यत् । यथा हि विषयत्वं ज्ञानमेव । तथोद्देश्यत्वमपि कृतिरेव । अपि चैवं स्वातन्त्र्येण वर्णानामस्मदादिभिरप्यर्थपरतया स्मरणात्, पौरुषेयत्वं स्यान्न वेदत्वम् । तत्रापि पारतन्त्र्यमिति चेत्, न; परकीयवेदानुमानात् पूर्वस्मरणस्योत्पद्यमानत्वात् । अपि चैवं प्रतिपुरुषं भिन्नं स्मरणमिति प्रतिपुरुषमन्योऽन्यो वेदः स्यात् । स्मृतीनां च सर्वासां वेदत्वं स्यात् । प्रत्यक्षेऽपि वेदतात्पर्यमनुमीयत इति सोऽप्यनुमेयः स्यात् । तत्र प्रत्यक्षोपस्थिते शब्दे तात्पर्यमनुमीयत इति चेत्, न; तत्रापि तात्पर्यदशायां शब्दस्य स्मरणोपस्थितत्वात् । अध्ययनविधिना प्रत्यक्षे तात्पर्यमेव धार्यत इति चेत्, न; अ इ च न च न विद्येत्यत्रापि अनुमानादेवावधारणात् । परिभाषा-

कृतश्चायं विशेषः। नरसाबलो (नासावत्रो)पयोगी, न चैवं वेदस्य स्वानुमेयत्वम्, किन्तु तात्पर्यस्य। न च तात्पर्यमेव वेदपदवाच्यम्। गीतेरेव सामपदवाच्यत्वमिति युक्तं लोके। सत्यपि तात्पर्ये वेदत्वाभावादपौरुषेयत्वं च वाक्यगतमिति वाक्यमेव वेद इति वेदनां करणं हि वेदः, वाक्यं च कारणं, न तु तात्पर्यमुच्यते। वर्णा एवानुमीयन्ते मन्वादि स्मृत्यारूढतया, न तु स्मरणारूढतया, तद्वशादेवानुपूर्वी अर्थप्रत्यायनाङ्गम्। लिपिवशादर्थप्रत्ययनात्। न च स्मृतिरेव वर्णविषया, अनुमेयानुवर्णा अपि, तेषां स्मृतत्वादिति वाच्यम्। न ह्यनुमाने हेतुः स्मरणं किन्तु स्मृता एव वर्णाः स्वरूपवन्तः। न च स्मृतत्वान्नानुमानविषयत्वम् अनुमानस्य गृहीतग्राहितया ग्राहित्वसम्भवात्। अपि चैवं क्वापि वर्णानुमानं न स्यात्। वह्न्यादिवत् तत्र सामान्येन स्मरणं विशेषस्य चानुमानमिति विभागाभावात्। न चैवं प्रतिपुरुषं वेदान्यतीनष्टिमर्थस्मरणनियतं वर्णविषयतया शक्यानुमानम्। विनियोगमनाकारणाभावात्। न चैवं तस्मान्नार्थावगम इति वाच्यम्। तदर्थशक्तस्वरूपाधिगममात्रस्य ह्यर्थाव(ग)महेतुत्वम्, न तु वर्णादिविशेषावधारणमुपयुक्तम्। हस्तकरपदसन्देहा(संकेता)दपि अर्थप्रतीतेः। अत एवास्य रागवशादप्युच्चारणं नास्ति। वर्णनियमावधारणोक्तनियतस्योच्चारणाभावात्। न वा स्नानविरहादमन्त्रब्राह्मणात्मकत्वादवेदत्वम् स्वाध्याये ह्य(स्व)यं विभागः। न त्वत्र अयं त्वन्य एवानियतस्वरूप इत्युक्तम्। यथा च परेषामपि श्रुतार्थापत्त्या एवंविधशब्द एव कल्प्यते।

नन्वेवं वेदानुमानपरम्परान्धपरम्परा स्यात्। नान्धपरम्परा। सर्वेषामेव स्मृतिरूपलिङ्गमयलोचनश(शा)लित्वादिति चेत्, एवं जात्यन्धवाक्यपरम्परापि प्रमाणं स्यात्। सर्वेषामेव जात्यन्धवाक्यात्मकलिङ्गमयलोचनशालित्वात्। रूपे मूलं प्रमाणं चक्षुः। तच्च तत्र नास्ति। इह तु शब्दे श्रोत्रं विद्यत इति विशेष इति चेत्, न, विद्यमानस्यापि श्रोत्रस्यानुपयुक्तत्वात्। तेन तादृशवेदाग्रहणात्। वर्णमात्रग्रहणस्य वर्णमात्रग्रहणस्येव जात्यन्धगोचरस्यानुपयोगात्। शब्दजातीयस्य गृहीतत्वात्। तादृशानुपूर्वीकं शब्दानुमानं शक्यम्। जात्यन्धेन तु सर्वथा रूपाग्रहणात्, रूपानुमानान्न शक्यमिति चेत्; एवं सति परम्परोऽपन्यासोऽनर्थक एव स्यात्। चक्षुष्मन्मूलमपि तदा जात्यन्धवचने प्रमाणं स्यात्। स कथं विद्रसादिव्यतिरिक्तं रूपं नाम गुण इति ज्ञात्वाऽनुमिनोतीति चेत्, एवं तर्हि सममन्धपरम्परायामपि। अपि चैवं मन्वानुमानपरस्परे(परम्परैव?)वात्र किन्न स्यात्। कृतं वेदेन। नियोगस्यानुमानागम्यत्वात्। कथमेवं स्यादिति चेत्, न; प्रमाणान्तराप्र-

तीत्या स्वस्य तदनवगम्यत्वम् न तु तत् प्राग्राजाज्ञया। तत् प्रथमं न (प्रथममनु)- मानावगम्यो न स्यात् । वेदमूलस्मृतिस्तुतिर्भविष्यति ।

उच्यते । नानुमानगम्यत्वमस्य युक्तमित्युक्तम् । ज्ञानान्तरविषय- तयाऽनुमानेनोपनयात् । एवं पूर्वस्यानुमानस्येयं विधेत्यप्रामाणिकमेव स्यात् । अत एवान्धपरम्परापि न प्रमाणम्, तत्राप्यन्यज्ञानेनार्थः स्व- विषयतया अनुमातव्यः, तत्कथमनुमानं तत्र प्रमाणं स्यात् । इह तु स्मृत्यनुमि- तेन वक्तृज्ञानेन कारणतया वेदोनुमीयते, न तु ज्ञानान्तरविषयतयेति। बीजाङ्कु- रप्रवाहा चादिपरम्परेति । अत एव व्यवहारादपि शक्तिरेवानुमीयते, न तु शक्ति- ज्ञानवृद्धस्य ततः शक्तिर्येनान्धपरम्परा स्यात् । तस्मान्नित्यानुमेयो वेदः स्मृतेर्मू- लमिति । विरोधे यत्रापि प्रत्यक्षश्रुतिविरुद्धा स्मृतिस्तत्र किं वेदानुमा- नान्नवे ति सन्देहः, तत्र पूर्वपक्षे स्मृत्यनुमितप्रत्यक्षश्रुत्योः सुन्दोपसुन्दन्यायात् परस्परव्याघातादप्रामाण्यमिति सङ्गतिः ।

ननु यद्यनुमिता श्रुतिः प्रत्यक्षश्रुत्या तुल्यबला तदा व्रीहियववद्विकल्प एव स्यात्, न तु व्याघातः । अथातुल्यबला तदा बाध एव स्यात्, न पूर्वपक्षः ।

अथोच्यते, सत्यपि तुल्यबलत्वे युगपदुपस्थापनाभावात्, न विकल्पः । तुल्यकालोपस्थितयोर्विकल्पाङ्गिकारात् । नापि बाध्यबाधकभावः । तुल्यबलत्वा- देव । तत्र यदि ह्येकस्य विलम्बः कथं तुल्यबलत्वम्, एकस्य शीघ्रभाविनो बलवत्वात् ।

अथापि किञ्चिद्विलम्बेऽपि अनन्यथासिद्धत्वात्तुल्यबलत्वं तथापि विकल्प एव । विषमविशिष्टयोरपि षोडशिग्रहणात् ग्रहणयोर्विकल्प- दर्शनात् । ग्रहणविध्यपेक्षो हि ग्रहणनिषेधः । न तुल्यकालत्वम् । अप्रस- क्तस्य निषेद्धुमशक्यत्वात् । न च षोडशिग्रहणस्य रागात् प्रसक्तिरस्ति, किन्तु विधित एव । तथा पञ्चदासाधिकरणपूर्वपक्षे विषमविशिष्ट- योरप्याश्रयंवरणाचरणयोर्विकल्प इष्यत एव । तत्र बाधकः न ग्रहग्रहणादौ स्वरूपाधिगमे विलम्बो नापि ग्राहकान्वये । निषेधपूर्वता तु विलम्बे न स्यात् । अतो ग्राहकान्वययौगपद्याद्विकल्पः । अपि वा विधिनिषेधताप्यनयोर्न स्व- विधितोऽङ्गविधीनामनुवादकत्वात् । किन्तु प्रयोगविधित एवेति तत्रापि नाविलम्बः । तन्न । यदि विलम्बेन व्याघातः, तर्हि विनियोगदशायामपि विल- म्बेन तयोरेव ज्ञानयोर्व्याघातो धि (दु)र्वारः, ग्राहकग्रहणयौगपद्यात्, तस्मि-

न्नेव, परं ज्ञाने व्याघातो न स्यात् । किञ्च वरणावरणयोर्ग्राहकान्वययौगपद्यं औपदेशिकस्य प्रथमम् । ग्राहकान्वयात् । न च प्रयोगविधितो विधिनिषेधरूपता । तथा सत्युपजीव्योपजीवकभावाभावप्रसङ्गात् । अङ्गं सत्प्रयोगवचनेन गृह्यते । नचाविहितमङ्गं भवतीति विविक्तं मन्त्राधिकरणे । किं च, विकल्पो हि ज्ञानयोः परस्परमेकदेशबाधरूपः । व्याघातस्तु सर्वथा बाधात्मक एव । तत्र पादे विषय-शिष्टेन पूर्वज्ञानमुपजातः विरो(धे)धितया सकलव्यक्तिविषयं जातमिति नैकदे-शेऽपि बाध्यते । कथं तदा सर्वथा बाधः । त(य)दिदं परेण पूर्वं विकल्प्यते । किंतु बाध्यत एवेति क्षीरं विहाय सौवीरे रुचिररोचकग्रस्तस्य । न च तुल्य-कार्यताऽभावान्नात्र विकल्प इति वाच्यम् । विकल्प्याद्यु(बु)भयैकदेशबाधात्मकः । न च बाधे विरोधादन्यो हेतुरस्ति, तुल्यकार्यकरत्वे विरोध एव विकल्पहेतुः, एकेन कृतस्य कार्यस्यान्येन करणायोगात् । तदिह काप्येककार्यता वचनात् विरोधोन्नयनं क्वापि विरोधबलादेव कार्य्यैककल्पनं यथा ग्रहणाग्रहणे, अन्यथा ग्रहणकार्येऽग्रहणेन कृते वैगुण्यप्रसङ्गात् ।

चन्द्रस्तु, पूर्वपक्षी दुर्बलमनुमानं प्रत्यक्षमिति श्रुतिविरोधेऽपि श्रुतेः । सापेक्षत्वेनाप्युपपत्तिं सम्भाव्य प्रवर्तयतीति । तथा चानुमाने प्रवृत्ते प्रत्यक्षश्रुतेः सापेक्षता निश्चीयते, प्रत्यक्षे च वेदे अप्रमाणे तदप्रामाण्यमाकलय्यानुमितापि श्रुतिरप्रमाणं भवति, तदेवमनुमिता श्रुतिः प्रत्यक्षामप्रमाणीकरोति प्रत्यक्षाप्यनुमितामिति । तन्न । यदि स्वत एव शङ्का वेदे ततः सिद्धान्तेऽपि स्यात् । अथ यथा भेदग्राहिणोऽनुमानस्यान्यथासिद्ध-त्वात् तद्बलाज्ज्वालाप्रत्यभिज्ञाने शङ्कोत्थापनम्, तथात्र । तन्न, विकल्पेनाप्यु-पपत्तेः । अन्यथा व्रीहिवाक्यमपि शङ्कामुत्थाप्य तत्रत्यं वाक्यं बाधते । न च दुर्बलं बलवदन्यथासिद्धं कृत्वा बाधते । यत्र तस्मिन् बाधिते स्वयमबाधितं भवति । इह तु स्वव्याघातहेतुः, कथं श्रुतेः सापेक्षत्वमुन्नीयते । अत एवाचार्या-धिकारमप्यध्ययने सम्भाव्य स्मृतेर्वेदानुमानम्, तथा प्रत्यक्षवेदेन इत्याकारकम सम्भावनयाऽनुमानमिति निरस्तम् । तुल्यदोषत्वात् ।

उच्यते । स्मृत्यनुरूपा हि श्रुतिरनुमातव्या । स्मृतिश्च न वैकल्पिकं सर्ववेष्टनं प्रतिपादयति । यदि तु कल्पसूत्रकारस्य विकल्पोऽभिप्रेतः स्यात्ततो वाकारमेव प्रयुञ्जीत । स्वापत्ते पदप्रयोगे कथमवाचकं पदं प्रयोज्यामह इति न्यायात् । तथा व्रीहियवयोर्वाकारमेव प्रयुक्तवान्

व्रीहीन् वा यवान् वा हवींषि कुर्यादिति सहैव च स्पर्शनेन सूत्रकारः सर्वेवेष्टनं स्मरति । तदस्य समुच्चय एवाभिप्रेत इति प्रतीयते ।

न पौरुषेयाणि वाक्यानि अविरोधार्थमन्यथा व्याख्यायन्ते। येनात्र विकल्पाभिप्रायः कल्प्यते। तथा च वह्निना सिञ्चेदिति ःहि प्रमाणं स्यात् । वह्निशब्दस्य विरोधेन जललक्षकत्वात् । तथैव लोके लक्षणादिना प्रयोगो दृश्यते यत्र, तथैव लोकानां प्रयोगः । यत्र वा स्वारसिकप्रया(मा?)णे प्रयोजनं दृश्यते, यथा सिंहो देवदत्त इति सिंहगुणानां प्रत्येकमभिधानप्रमासम्भवात्। इह तु वाकाराप्रयोगे उपस्पर्शेऽपि लोकानां स्पर्शाभिमानात् समुच्चय एव स्यादिति विकल्पोऽभिप्रेताकार एव युक्तः।कल्पश्चायं प्रतिपत्तिसम्पत्कायैव कृतः। अन्यथा तु वेद एवास्ति किं कल्पेन। तस्मात् घृ(श्रु?)तिरपि तादृश्येवानुमातव्या ।

न तु प्रत्यक्षश्रुत्या विकल्पमर्हतीति व्याघात एव। सिद्धार्थवत्तुल्यबलप्रमाणविरोधात् । यथा हि तद्विकल्पेन समाधातुमशक्य(त्वं)त्वात्तथेदमपि ।

पूर्वपक्षस्तु-इतरस्मृतिन्यायादत्रापि वेदानुमानमेव ।

ननु बलवद्विरोधे कथमनुमानम्। विरुद्धार्थयोरपि श्रुत्योर्दर्शनादत्र विरोध एव नास्तीति चेत्, न हि विरुद्धार्थयोर्दर्शनम्, कथं विरोधः, कथं दर्शनमिति स्ववचोव्याघातात् । आपाततो विरुद्धार्थत्वेन प्रतीयमानयोः सहदर्शनाद्विरोधाभाव इति चेत्, सत्यमेवं यत्र दर्शनं तत्राविरोध एव । अस्मिंस्तु विषये दर्शनाभावात् कथमविरोधः । नव (च) दर्शननिमित्तको विरोधः, किं तु सहज एव । अदर्शननिमित्ते च क्वापि विरोधे(धः) स्यात् । एकस्यैव वस्तुनो द्वाभ्यां प्रमाणाभ्यां शुक्तिकारजतत्वबोधनात्तयोरप्यविरुद्धत्वापत्तेः । तस्मादेकस्मिन्देशे, एकस्मिन्काले, एकस्य भावाभावौ स्वरूपतये(या) विरुद्धे (द्धौ)। शुक्तिकारजतयोरपि परस्परभावव्याप्यत्वात्, तदापादकतयैव परस्परयोरविरोधः । तदिह स्पर्शनसर्वेत्रेत्यनयोः परस्पराभावापादकयोः विरोधस्तब्दलाच्छब्दाभावः कल्प्यत इति चेत्, तर्हि त(तज्)ज्ञानमनुमानबाधकम् । न च तदनुमानाद्बलवत्, सुतरां विलम्बात् । मूलबलाद्बलवदिति चेत्,नः सर्वेषामेव प्रत्यक्षमूलत्वात् । अत एवागमबाधः प्रागुक्तः । तस्यापि भिन्नविषयत्वात् । न चागमोनुमानाद्बलवान् । द्वयोरपि प्रत्यक्षमूलत्वात् । न हि शुचिनरः, शिरष्कपालं प्राणाङ्गत्वात् शङ्खशुक्तिवदित्यनुमानमपेक्ष्यते, किन्त्वागमग्राहकं प्रत्यक्षं शुक्तितानुमानमिव शुचिताग्राहकनुमानमिति । न चानुमिता श्रुतिः प्रत्यक्षश्रुत्या

बाध्यत इति युक्तम् । एवं सति वेदस्याप्रामाण्यमिति सर्वदेशनाप्रमाणं न स्यात् ।

न च तस्या बाधो युक्तः, अन्यथा सिद्धत्वासम्भवे विलम्बभावित्वेऽपि बलवत्वात् । अनुमानस्याबाधितत्वसामग्री न शास्त्रस्येति कथं तदनुत्पादी (दः), तस्मात्, व्याघाताद्प्रमाण्यम् ।

राद्धान्तस्तु । प्रत्यक्षेणैवानुमानं बाध्यते । यद्यपि प्रत्यक्षेण स्वतोनुमानविरोधि न सत्त्वमुपनीयते । तथाप्यागमादिज्ञानजननद्वारेण परम्परयैव विरोधः (बाधः)। यद्यपि च साक्षादनुमानविरोधिप्रमाणमनुमानाच्छीघ्रभावि, तथापि प्रत्यक्षे सिद्धे तस्य सामग्रीविच्छेदाभावात् । अन्यथासिद्धत्वान्नास्यानुमानेन बाधः । एवमनुमाने सिद्धे तद्बलात् प्रमाणविलम्बभाव्यपि न प्रत्यक्षेण वा स्मार्तम्, अनन्यथासिद्धत्वात् । तदस्मिन्विरोधे (ध) मूलयोरेवान्यथासिद्धिसम्भावनाग्रस्तयोर्बलाबलमनुसन्धीयते । तस्मादत्र प्रत्यक्षं बलीयः ।

न चानुमानस्यापि मूलभूतं स्मृतिग्राहकं प्रत्यक्षमेव वाच्यम् । तस्मिन्नसत्यप्यनुमानोत्पत्त्यसम्भवे तद्विच्छेदात् । तद्बलत्वस्यानुपयुक्तत्वात् । सति तु प्रत्यक्षेनागमेनावश्यं भवितव्यम् । सति चागमे तदनुरोधि प्रमाणं नास्तीति अनुमानस्यावश्यमुत्पादः ।

न तु स्मृतिप्रत्यक्षे सत्यवश्यं श्रुत्यनुमानेन भवितव्यम् । भ्रान्त्यादिमूलत्वेनाप्युत्पत्तेः । अत एव तत् प्रत्यक्षं नेदं रजतमिति प्रत्यक्षान्तरेण बाध्यते ।

न च प्रत्यक्षमेव साक्षाद्विरोधकं भिन्नकालीनवस्तूपनयात् । सति तूत्तरकाले रजतत्वे प्राच्यमपि तथात्वमित्यनुमानमवश्यं भावीति तद्बाधासम्भवात् । प्रत्यक्षयोरेव बलाबलं सम्भवति । तथात्रापि प्रत्यक्षेनानुमानबाधः ।

नन्वेवं स्मृत्यन्तरेष्वपि वेदानुमानं न स्यात् । अनैकान्तिकत्वात् । अविगीता च स्मृतिर्लिङ्गं बाधिता (बाधते), (न) तु विगीतेति, ततो नानैकान्तिकमिति चेत्, न; यद्यबाधितत्वमविगीतत्वम्, एवं तर्हि सर्वेष्वेवानैकान्तिकेषु हेतुषु बाधितत्वविशेषणादनैकान्तिकोच्छेदप्रसङ्गात् । न च प्रमाणसद्भावासद्भावौ प्रमेयसत्त्वासत्त्वौ (त्व)प्रयोजकौ येन विरोधिप्रमाणाभावेन विशेषितो हेतुःप्रयोजको भवेत् । अथान्यविगीतत्वं तर्हि विरोधं विनापि सर्ववेष्टनस्मृतिरप्रमाणं स्यात् । विरोधनिमित्तं विगानम्, न तु विरोध इति चेत्; एवं च तस्या विरोधवन्नाप्रामाण्यं

वस्तुनि प्रयोजकत्वं किं तु तत्ज्ञाने भ्रमादिशून्या स्मृतिर्लिङ्गम् विरुद्धायां तु सर्ववेष्टनस्मृतौ भ्रमादीनामुन्नयनान्न तच्छून्यत्वम्, अतो नानैकान्तिकमिति चेत्, न, भ्रमादिशून्यत्व एव लिङ्गाभावात् । तत्रा(दा)पि हि यदि स्मृतित्वं लिङ्गम्, ततोनैकान्तिकत्वमेव । औत्सर्गिकं मन्वादिस्मृतीनां भ्रमादिशून्यत्वं क्वचिच्च-बाधकादपोद्यत इति चेत्, न; भ्रमादिशून्यत्व(त्वे) एवालिङ्गाभावात् । तत्रापि स्मृतित्वं लिङ्गस्यौत्सर्गिकमिति प्रमाणानिर्धारणात् ।

उच्यते, भ्रान्त्यादिशून्यत्वम् भ्रमाद्यभावात्तव्यवहारश्च तन्मात्रबुद्धिनिबन्धनः । बाधितायां तु स्मृतौ बाधबलेन भ्रमाद्यवगमात् । संसृष्टबुद्धिरसौ न तन्मात्रबुद्धिः ।

नन्वेवं वेदप्रतियोगिकायामपि स्मृतौ तन्मात्रबुद्धिरस्तीति वेदाभावव्यवहारोऽपि स्यात् । नैवम् । वेदस्यादृश्यत्वात् । भ्रमादीनामपि दृश्यत्वमिति चेत्, न, द्वेधा हि तन्मात्रबुद्धिः । एका एकप्रमाणानुत्पत्तिलक्षणा, अन्या सकलप्रमाणानुत्पत्तिलक्षणा । तत्राद्या प्रमाणदृश्यतामपेक्ष्यते । द्वितीया तु प्रायशः तज्जातीये तद्दर्शनमपेक्षैव भूयोऽनुसन्धानविपयेपि सर्वप्रमाणानुत्पत्तिलक्षणा वर्तते । सैव तस्य दृश्यता । अयमेवो(वौ)त्सर्गिको न्याय इति शब्दार्थः । अत एव काकपत्तया(वत्तया)पुरुषाभावो व्यवह्रीयते । न तु काकशिखाबन्धनादनैकान्तिकत्वम् अत्र भङ्गः । वेदत्वं ह्यनादिकालसम्बन्धाद्भवति, तल्लक्षणत्वादपौरुषेयतायाः। तत्र प्रत्यक्षेनैककालसम्बन्धे विज्ञातेऽपि यादृशः पूर्वं पठ्यते तादृश एवायमिति न पूर्वकालपाठमनवगम्य भवति । तदवगमश्च प्रत्यक्षमूलाध्येतृस्मरणपरम्परयैवाभ्युपगन्तव्यः । तत्र मन्वादिस्मृतितो वा पूर्वकालसम्बन्धोऽवगम्यतामध्येतृवचनाद्वेति नानुमाने कश्चिद्विशेषः । इ(त)दानीन्तनकालसम्बन्धस्त्वेकत्र प्रत्यक्ष इतरत्रानुमानिकः । न चैवं कश्चिद्विशेषो भवति । पूर्वकालसम्बन्धित्वेनावगतस्य शब्दस्यार्थप्रतिपादकत्वात् । स्मृतस्य चाभिधायकत्वे सर्वत्र तत् काले प्रत्यक्षानुपयोगात् । तदुक्तम् "वेदो हीदृश एवायं पुरुषैर्यः प्रकाश्यते । स पठद्भिः प्रकाश्येत रश्मिभिर्वेति तुल्यभाक्" तथा च व्रीहिभिर्यजेतेति वाक्यश्रवणकाल एव यदि कश्चिद्वदति अस्मदीयशाखायां यववाक्यमस्ति । नैतावता तद्दुर्बलं भवति । उच्यते । स्यादेवं यदि प्रत्यक्षवेदे मूलं स्मृतिर्भवेत् । एतदर्थमेव नित्यानुमेयवेदपक्षपरिग्रहोस्माकम् । तथा चैकत्र पूर्व-

कालसम्बन्धेऽनुमानपूर्वकानुमानम्, अन्यत्र प्रत्यक्षपूर्वकमनुमानमिति, कथं तुल्यबलत्वम्। अत एव न मुखेच्छाया हानिः शङ्क्या। प्रत्यक्षत्वविरहात्।

ननु प्रत्यक्षेनार्थबाधः। तद्बोधितस्यागमस्य विकल्पितत्वेनाप्युपपत्तेः। अनुमानस्य तु सर्वथा बाधः। तद्यद्यागमस्यानुमानाद्बलवत्त्वमपि स्यात्। तथाप्यागमस्यान्यथासिद्धत्वात् नानुमानबाधकत्वम्। न च तस्यापि भ्रान्तित्वेनोपपत्तिरिति वाच्यम्। न ह्येवं तस्य स्वतः प्रामाण्यं घटितं स्यात् तस्य शास्त्रे तु विकल्पेऽपि प्रामाण्यं स्यादेव। सोयं कांस्यभोजिन्यायः।

न च बलवद्विरोधेऽनुमानं नोत्पद्यत एव। अतो नानुमानानुग्रहावसर इति वाच्यम्। तथा सति ज्वालाभेदग्राहिणोऽप्यनुमानस्यानुत्पत्तिप्रसङ्गात्। तथा च यत्र प्रत्यक्षस्यान्यथासिद्धिः सम्भावनायानुमानस्योत्पादस्तथात्रागमस्य। यथा च दुर्बलोऽपि निषेधो विधिना सह विकल्प्यते, विधेर्हि विकल्पेनाप्युपपत्तेः। निषेधस्तु सर्वथैव बाधितः स्यादिति तथात्रापि।

सत्यमेवं यद्यथं विकल्पसमाधेयो विरोधः स्यात्। नत्वयं तथेत्युक्तम्। अतो यदि प्रत्यक्षमूलतैव स्मृतीनां भवेत्, तथाप्यावश्यकेन्यतरबाधे स्मृतेरेव बाधः। न हि यादृशं श्रुतावधानं सर्वेषां पुंसां तथा स्मृतावस्ति। बहवः पुमांसो विच्छेदेन वेदं पठन्ति। स्मृतेस्तु मूल एक एव पुरुषः तत्र भ्रमसम्भावनाऽयुक्ता। न्यायाभासेनाप्यर्थमवगम्य स्मृतिप्रणयनसम्भवात्। अङ्गं वा समभिव्याहारादिवत्। अत एव यत्र श्रुतित्व एव विप्रतिपत्तिरस्ति। तत्र स्मृतिविरोधात्तस्या अश्रुत्वमेवोन्नीयते। उदाहरणभङ्गास्तु न्यायनिपुणत्वान्मीमांसायां गुरुणोपेक्षणीया एव, एवं हि ते वदन्ति। सर्वशब्दस्य किञ्चित्परित्यागोऽपि लोके सर्वो ग्रामो दग्ध इत्यादौ प्रयोगदर्शनात्। श्रुतिविरोधात्तस्य सङ्कोचः क्रियतां न त्वप्रामाण्यमेव। स्पर्शनश्रुतिरेव वा स्मृतिप्रामाण्यरक्षार्थं लक्षणयोपस्पर्शनमभिधत्ताम्। न च कल्पकारः सर्ववेष्टनं स्मरति, किन्तु वेष्टनमात्रम्। न च तत्र स्पर्शनेन विरुध्यते। तथा सति कुशवेष्टनस्यापि विरोधापत्तेः। न च तस्यापि बाधो युक्तः। तत्र लोभादीनामसम्भवात्। तच्चेदं वासोवेष्टनं साधायन (साङ्ख्यायन) शाखागतं श्रुतिमूलमेव। तामुभयतो वाससा वेष्टयन्तीति श्रुतिः। तथा क्रीडराजको अभोज्यान्न इति। तस्मादग्नीषोमीये संस्थितयजमानगृहेऽसिध्यते इति विरोधद्वयं शक्ताशक्ततया वा स्वदत्तनियुक्तदत्तविषयतया वा क्रत्वर्थपुरुषार्थतया न त्वन्तबाधो युक्तः। श्रुत्या यच्छिन्नमत्यन्तं बाध्यते। तत्र श्रुतौ सत्यां कस्यचिदनुपपद्यमानप्रमाभावात्।

इह तु श्रुतौ सत्यामपि स्मृतेर्मूलेनावश्यं भवितव्यमिति न महाजनविरोधि भ्रान्त्यादि कल्पनं युक्तम् । किं तर्हि ? व्यवस्था कल्पनमेव तथा चाष्टाचत्वारिंशद्वर्षं वेदब्रह्मचर्यचरणमाश्रमान्तरग्रहणपक्षे भविष्यति तस्याश्रमविकल्पपक्ष एव स्मरणात् । स्मृताविति ग्रहणान्तिकावेति विकल्पान्मानात् । यदा त्वाश्रमान्तराणामपि प्रत्यक्षवेदाभावात् परामर्षसौत्रं निरवोदनादपरददीति न्यायादाश्रमान्तरासम्भवः(वात्) तदा साध्वेवोदाहरणम् । न च तदाद्रियते अनन्यथासिद्धार्थबलाद्वा नानाश्रुतिबलाद्वा आश्रमाणामनुमितेः, अत्राधिकरणारम्भापेक्षः (क्षौ) भवेतां व्याघातबाधौ यदि विरोधः स्यात् । न च कार्ये विरोधः कश्चिदस्ति । सिद्धस्य हि वस्तुनः एकस्य शुक्तिकात्वं रजतत्वं वेति विरुध्यते । इह तु द्वयोः स्पर्शतः(न)सर्ववेष्टनयोः कार्यत्वं कथं विरुध्यते । एकस्मिन् विषये द्वयोर्धर्मयोर्वि(र्वि)रोधः स्यात् । न चेहैकविषयत्वमस्ति बन्धने,अधिष्ठानभूतानुबन्धभेदेन स्पर्शनसर्ववेष्टनकार्ययोर्भिन्नत्वात् । नचैकक्रत्वाश्रयत्वेन तयोर्विरोधः । अनुष्ठानं तयोरेकस्मिन्प्रयोगे विरुद्धम् । न चानुष्ठानशब्दार्थः फलत्वात् । शाब्दत्वेऽपि तस्योत्तरकालीनत्वात् । न तेन विनियोगो बाध्यते । सिद्धान्तो(न्ते) येऽपि बाधप्रसङ्गात् । न चानुष्ठानमेव कार्यम्, कार्यस्य सोमयागस्यैकत्वेपि अनुष्ठानस्य भिन्नत्वात् । भेदेऽपि चैन्द्रदधिपयसोरनुष्ठानस्यैक्यात् । कृष्णलेऽवघातस्याकार्यत्वज्ञानस्य दर्शनात् । तत्रा।तदेशज्ञानमन्यत्रानुष्ठानफलकमिति चेत्, तर्हीदमपि पाक्षिकानुष्ठानफलं भविष्यति । नित्यवर्ज्जनस्य कथं पाक्षिकमनुष्ठानं फलं भविष्यतीति चेत्, सर्वविषयज्ञानमबाधितमिति चेत्, तदिहापि तुल्यम् । यथा चैकफलं प्रति श्रौतस्मार्तकर्मणि विरुध्येते । अनुष्ठानं पाक्षिकं भवति । तथात्रापि बाधे सर्वस्मृतेर्बाधप्रसङ्गात् । न हि श्रौतेभ्यः फलेभ्यो अन्यस्मै किञ्चित् स्मार्तं विधीयते ।

नन्वेवं सर्वबाधोच्छेदप्रसङ्गात्(प्रसङ्गः) स्यात् विरोध्यभावात् । नेदमनिष्टं चोद्यं वादिनः, अपि च श्रुत्या लिङ्गं बाध्यत इति युक्तमेव । विनियोगापेक्षायां श्रौते विनियोगे सति लैङ्गिके विनियोगे कारणाभावात् । श्रुतौ सत्यामपि स्मृतेर्मूलापेक्षा विद्यत एव ।

उच्यते । कार्यमेवानुष्ठानम् कृतिघटितं हि कार्यम् कृतिश्चानुष्ठानम्, अतः कार्यघटकत्वादधिष्ठानस्यादूरविप्रकर्षात् कार्यमेवानुष्ठानमुच्यते । अतो अनुष्ठानविरोधे भवति कार्यविरोधः । न चैवमेकफलवत्तयोः कर्मणो-

विरोधः स्यात् । फलार्थिनं प्रत्यवश्यकर्तव्यतोपदेशाभावात् । कदाचित् कर्तव्यतायाश्च विरोधाभावात् ।

नन्वेमङ्गेष्वप्येवं, नित्यकर्तव्या तु तत्कार्यकरणस्यान्यस्याभावादर्थात् सिध्यति, एकसाधनक इव फले साधनस्य । मैवम् । न ह्यनङ्गविधयो विधेयाः प्रधानविधिवत्, किन्तु प्रधानविध्यधिना(?)च यवा एवाप्रधानविधिरेव तु सर्वाङ्गयुक्तं प्रधानं विदधाति । न च परस्परविरुद्धाङ्गयुक्तस्य प्रधानस्य कृतियोगार्हतापि विद्यते । तादृशस्य वस्तुनस्त्रैकाल्येप्यभावात् । सुतरां कृतियोगाः । नन्वेवं व्रीहियवयोरपि विरोधः स्यात् । न चायं विकल्पः समाधेयः । अनुष्ठाने ह्ययं समाधिः, न तु विनियोगेः तत्र तस्याङ्गीकारात् ।

तत्र चन्द्रः—अगत्या विधिद्वयं भवति । तत्रैकस्मिन् विधौ यवानां सम्बन्धोऽपरस्मिन् व्रीहीणाम् विधिद्वये चाधिकारस्यावृत्त्या सम्बन्धः । विषयैक्याच्चैक्यव्यवहारः । इह तु श्रुतिविरोधात् । सर्वैवेष्टनस्य ज्योतिष्टोमशास्त्रेणैकवाक्यतागतत्वात्, नेयं कल्पनेति ।

तदयुक्तम्, अधिकारस्य ह्यस्यानुषङ्गात् सम्बन्धो भवेत् । न चात्रऽवाक्यद्वयमस्ति येनानुषङ्गः स्यात् । तत्रैकस्यैव यजिपदस्यावृत्तिः पौरुषेयी स्यात् । नित्याधिकार इव द्वयोरेव व्रीहियवप्रयोगयोरनुष्ठानं स्यात्।एक एव च व्रीहियवयो-रविकृतौ वर्तेत । प्रयोगमात्रं भिद्यते न त्वधिकारविधिरपीति चेत्, अधिकारविधौ च विरोधस्यापरिहृतत्वात् । प्रयोगद्वयं च परस्परविरुद्धं कथमेकस्मिन्विधौ सवद्धम् । यौ विनियुक्तौ तयोरन्यतरदित्यनेन रूपेण प्रयोगोप्येक एवेति चेत्, न; विनियोगस्य पाक्षिकत्वमन्तरेण तादृशवर्णनस्यासम्भवात् ।

उच्यते । तत्रागत्या कतिचिद्वशक्तिगर्भ एव व्रीहियवयोः सम्बन्ध आश्रीयते । तेनायमर्थः । कदाचिद्व्रीहियवशास्त्रयोर्नित्यत्वमेव सम्बन्धात् । न चैवं कृष्णलावघातेप्यनुष्ठानविरोधात् कार्य (र्ये)विरोधः स्यादिति वाच्यम् । अतिदेशस्य समुदितविषयत्वात् । प्रतिस्वमविवेचनात् । शस्त्रुहततस्य च हविःप्रकृतिद्रव्यमात्रेणोल्लेखात् । विशेषेण कृष्णलापुरस्कारात् ।

नन्वेवं विनियोगकाल एवानुष्ठानरूपायाः कृतेरवगमान्नापरोनुष्ठानाक्षेपः स्यात् । यथायमपरस्तथा चतुर्थो (र्थे) वक्ष्यामः । अपि चैवमविरोधे सर्वत्रविषयविरोधनिबन्धनविरोधोच्छेदः स्यात् । तद्यथोत्पत्तिशिष्टं नैमित्तिककाम्याभ्यां नित्यं विशेषविहितेन सामान्यविहितं निरवकाशेन सवि (सा व)काशम्,

अनन्यथासिद्धेनान्यथासिद्धम्, प्रकरणाधीतेन प्रकरणानधीतम्, पूर्वेणापूर्वम्, औपदेशिकेनातिदेशिकं बाध्यत इत्यादौ । अत्राकाङ्क्षारूपकारणाभावादेव बाधो न तु विषयविरोधात् । श्रुतिलिङ्गादिविधेति चेत्, न, आकाङ्क्षोत्थापनेनैव बहुशः शेषिणि शेषविनियोगात् । न हि नित्यं प्रति तत्राकाङ्क्षोत्थापनम् । किन्तु नैमित्तिकं प्रति । अतिदिष्टस्य कथं बाधः ? प्राप्तेरङ्गीकारात् । किमाकाङ्क्षाविरहः करिष्यति । तस्मात्सिद्धं श्रुत्या स्मृतिर्बाध्यत इति ॥ ४ ॥

प्रयोगो० ॥ (१ । ३ । २४) किमाकृतिः शब्दार्थः किं वा व्यक्तिरिति सन्देहः । गवादिशब्दानामा(म)त्रोदाहरणत्वं न त्वाग्न्येय्यादि पदानामपि तेषां व्यक्तिवाचित्वस्य सिद्धान्तेप्यनुमितेः । कथं पुनरत्र सङ्गतिः, व्यक्तिवाचित्वेपि आग्नेयादि पदानामिव प्रामाण्योत्पत्तेः । अथाकृतिवाचित्वपक्षेऽक्रियार्थत्वप्रसङ्गादप्रामाण्यं प्रसज्यत इति पूर्वपक्षिणः सिद्धान्ते अप्रामाण्यापादनात् सङ्गतिः । तन्न । पूर्वपक्षे यद्यप्रामाण्यं तदा सङ्गतिर्भवेत् न तु तत्प्रसङ्गेन प्रसङ्गस्य तर्करूपतया पक्षत्वविरहात् । न च किमाकृतिर्वाच्या किं व्यक्ति रित्यनध्यवसायात् सङ्गतिः आकृतेर्विशिष्टा व्यक्तिर्वाच्येत्यनध्यवसायासम्भवात् ।

उच्यते । गवादि शब्दानां न क्वापि सम्बन्धावधारणं शक्यमतोऽप्रतिपादिकत्वान्न वेदः प्रमाणमिति पूर्वपक्षकरणात् सङ्गतिः । तथाहि न तावद् व्यक्तिर्वाच्या । व्यक्तीनामानन्त्यात् सम्बन्धावधारणाशक्तेः । या व्यवहारे दृश्यन्ते स्वप्रकृतिस्वमेवानैकात्मविधायासम्बन्धावधारणमिति चेत्, न; एवं सत्यद्यजातायां गवि व्यवहारासम्भवप्रसङ्गात् । वि(वे)दस्य च प्रतिपुरुषभिन्नभिन्नादिमदर्थप्रतिपादकतयाऽप्रामाण्यापत्तेः । ताश्च यदि समुच्चये नार्थस्तदा सर्वव्यक्त्युपादानासामर्थ्यादप्रामाण्यम् ।

अथ विकल्पेन, ततस्तात्पर्यानध्यवसायेन न च वाक्यशेषवशान्निर्णयः । तत्रापि तद्दोषात् नाप्याकृतिरर्थः । तस्यां व्यवहारादर्शनात् । तन्मूलत्वाच्च व्युत्पत्तेः । तथाहि—नाकृतेर्गमनादिक्रियासु कर्तृत्वं तत्समयाभावात् । नापि कर्मता, तज्जन्यफलभागित्वाभावात् । अत एव दानादिना अपि न कर्तृत्वकर्म्मत्वे स्तः । अचेतनायाः स्वामित्वाविरहात् । सर्वसाधारणभूताया विशेषतः किमपि स्वत्वविरहात् । अत एव न करणत्वं क्रियाकर्मण एव करणत्वात् । नाप्यपादानत्वम्, तया सह विभागाभावात् । नाप्यधिकरणमाधारत्वविरहात् । न च षट्कारकबहिर्भूताया अक्रियारूपाया व्यवहार-

गोचरत्वमाकृतेरस्ति। क्रियाया एव कारकानुरक्ताया व्यवहारगोचरत्वात्। व्यक्तिद्वारेणाकृतेः क्रियायां व्यापारादस्ति कारकत्वमारुण्यादेरिवेति चेत्, न; नहि क्रियाफलभागि व्यक्तिद्वारा आकृतेः क्रियाफलभागि(त्व)लक्षणं कर्मत्वं सम्भवति। किन्तु सम्बन्धितामात्रम्। कथञ्चित् व्यक्तिद्वारत्वमाकृतेः। व्यक्तेरध्यवसायमाकृतिः करोतीति चेत्, नः अव्य(ध्य)वसायमिति ज्ञानमुच्यते। तच्च कस्मिन्काले? न तावत् स्वाध्यायकाले। तत्काले व्यापारोऽस्यापि विधिवाक्यानामिवानङ्गत्वप्रसङ्गात्, काम्यवत्। तदा व्यापारः किमाकृतेः। किं वा तज्ज्ञानस्य। नाद्यः, व्यक्तिज्ञानस्य सदातनत्वप्रसङ्गात्। न द्वितीयः, सम्विद्भेदापत्तेः। नापि प्रयोगकाले। आकृत्यवगमकाले व्यक्त्यवगमस्यापि सिद्धेः।

अथाकृतिरालोचनात्मविषयं जनयति। तच्चालोचनं विशिष्टव्यक्तिविषयं सविकल्पकमुत्पादयतीति विशिष्टव्यक्त्यध्यवसायेनाकृतिर्न व्याप्रियत इत्युच्यते। तन्न। यदि हि विशिष्टा व्यक्तिरङ्गं स्यात्, ततस्तदध्यवसायो व्यापारः स्यात्। तच्च विशेषणस्याकृतेरङ्गत्वे सम्भवति। तदेव तु व्यापाराभावादाक्षिप्तम्। अवश्यादीनामपि वात्रोदाहरणत्वादारुण्यवदित्यदृष्टान्तः। अत एवाकृतिविशिष्टा व्यक्तिर्वाच्येत्युक्तम् दूषितत्वात्।

नाप्युपलक्षणं रूपान्तरेणावगतमन्येनोपलक्ष्यते। न च व्यक्तेराकृतिं विना रूपान्तरमस्ति। का व्यक्तिरुपलक्ष्यते। किं काप्येका सर्वा वा। नाद्यः, अनध्यवसायप्रसङ्गात्। अनन्या अवाच्यत्वप्रसङ्गाच्च। न द्वितीयः। अनन्तकल्पनाप्रसङ्गात्। अनन्तासु चागृहीतास्वसम्बन्धावधारणासम्भवाच्च। एकेनोपलक्षणेनैक्याच्छक्तेरनन्तरत्वम्। नाप्यनवधारणं ताद्रूप्येनावधारणसम्भवादिति चेत्, न; उपलक्षणस्यैकत्वात्। किमुपलक्ष्यणस्यैकत्वं भवति ज्ञायते वा। उपलक्षणस्यैकत्वमेवोपलक्षणस्यैकत्वं वा। नाद्यः। भिन्नानामुपलक्ष्याणामेकत्वस्य कर्तुमशक्यत्वात्। नापि मध्यमः। असत एकत्वस्य ज्ञानासम्भवात् अत एवाकृतिविशिष्टा व्यक्तिर्वाच्येति विन्ध्यवासिमतं निरस्तम्। विशेषणैक्यादपि विशि(शे)ष्यभेदादेव विशिष्टानन्तत्वात्। अतो व्यक्तिः संयोगाविशेषरूपाकृतिर्जातिश्चेति त्रितयम् शब्दार्थं इत्यक्षपादीयमतं निरस्तम्। व्यक्तेरनन्ततत्वस्यापरीहारात्। अतो व्रीहीन्प्रोक्षतीति व्यक्त्यर्थः। श्येनजितं चिन्वीतेत्यत्राकृतिरर्थः। इति पाणिनेरुभयं सम्मतं निरस्तम्।

राद्धान्तस्तु। यत एवान्य पक्षे(क्षो)न सम्भवं(व)ति। अत एवाकृतिः

शब्दवाच्या तस्यामेकस्यां सम्बन्धस्य सम्भवात्। न च क्रियायोगाभावादवाच्यत्वम्। य एव हि क्रियायोगः स एवाकृतेः। नहि केवलाया व्यक्तेः कारकत्वावधारणं शक्यम्। तस्याप्यन्वयव्यतिरेकावगम्यत्वात्। गमनादियोगोप्याकृतिविशिष्टाया एव व्यक्तेः प्रत्यक्षादिभिरवगम्यते। न कृतिं परित्यज्य व्यक्तिरायातीति कश्चित् प्रत्येति। शुद्धाया आकृतेः क्रियायोगित्वं नास्ति। न तु परोपसर्जनभावेनापीति। तद्यथा केवलस्य दध्यादेर्विधेयत्वं नास्ति। तद्विशिष्टायारतत्क्रियाया विधेयत्वात्। दध्याद्यपि विधेयम्। तथात्रापि। अतथ्या (एवा)-कृतेर्व्यक्तिं प्रति विशेषणत्वमेव व्यापारो न त्वन्यत्(?)कश्चित् समवायातिरेको। न चासाधनात्मकत्वादव्यापारत्वम्। साधनं हि प्रतिसाधनस्यान्तरायं व्यापारो भवति। न च जातिर्व्यक्तितः साधनान्तरम्। विशिष्टस्यैव साधनान्तरत्वात्। अयमेव च व्यापारोऽध्यवसायो नाम जातिसमवायेनैव विशिष्टव्यक्त्यध्यवसायात्। न तु ज्ञानमेव जातेर्मन्त्रपदवद्व्यापार इति द्रष्टव्यम्। अचेतनकर्तृकास्वपि क्रियास्वाकृतेर्व्यापारात्।

अत एव विकाराभावाज्जातेरकारकत्वमिति निरस्तम्। विशिष्टस्यैव विकारात्। विकारं विनापि च सहस्वभावमात्रेणैव कारकत्वावधारणात्। जातिविशिष्टैव व्यक्तिः स्वामिनी स्वं चेति जातेरपि ताद्रूप्यम्, निष्क्रियायास्तु तस्याः साधारणमित्यदोषः।

नन्वेवं कथं केवला जातिर्वाच्या तादृश्याः क्रियायोगाभावात। सत्यम्। आकृतिविशिष्टैव व्यक्तिः शब्दात्प्रतीयते। नागृहीतविशेषणान्यायात् कल्पनालाघवाच्च। जात्यंश एव शक्तिः, न तु केवला जातिः प्रतीयते। क्रियायोगिनी(लाभा)वात्।

ननु शब्दशक्तिमन्तरेणापि व्यक्तिः प्रतीयमाना। का प्रतीयते ? न सर्वा सर्वोपादानप्रसङ्गात्, सर्वव्यक्त्यवगमाच्चैवं सर्वः सर्वज्ञः स्यात्। न च प्रातिस्विकेन रूपेण तत् प्रतीतानां कार्यत्वमुक्तम्। ताः प्रत्यन्वयव्यतिरेकतः कारकत्वस्यासम्भवात्। न च का(क)चिदेका प्रतीयते। तथा सति व्यक्त्यन्तरद्वारेणाकृतेः कार्यान्वयविरहप्रसङ्गात्। प्रतिपुरुषं च भिन्नभिन्नप्रतीतौ शास्त्रार्थस्याव्यवस्थितत्वप्रसङ्गात्। व्यक्तिमात्रं प्रतीयत इति चेत्, न; अयं हि मात्रशब्दः साकल्यार्थः, सामान्यार्थो वा। प्रथमे उक्तमुत्तरम्। द्वितीये तु व्यक्तेरप्रतीतिप्रसङ्गः। एतेन व्यक्तिवादिना व्यक्त्यभिधानं निरस्तम्।

उच्यते। रूपमेव हि व्यक्तीनां भेदोऽभेदश्च। नहि व्यक्तिनां स्वरूपमेव हि भेदः। तथा सति गृह्यमाणस्मर्यमाणयोः शुक्तिरजतव्यक्त्योर्भेदाग्रहाप्रसङ्गात्। रूपमादाय न रूपतो भिन्नाः, किन्तु स्वरूपत एव। अत आह रूपं रूपतयेति। तस्माद्धर्मिणो धर्मभेद एव भेदो वर्णस्य तु स्वरूपमेव। तदिहापि व्यक्तीनां यदेकं रूपं सामान्यं तस्या भेदादभेद एव। खलु मुण्डादीनां तु रूपाणां भेदाद् भेदोऽपि।तदिह सामान्येन सामान्यरूपेण व्यक्तीनां शब्दादवभासान्नानन्तस्य प्रतिपाद्यत्वम्। नाप्यनन्तोपादानम्। एकव्यक्त्युपादाने तु सामान्यरूपसम्पत्तेः।

न चैवं स्याद्वादावतारेऽपि दिगम्बरपक्षपात इति वाच्यम्। धर्मधर्मिभेदाभेदौ हि नाङ्गीक्रिय(ये)ते। धर्मी तु केनचिद्रूपेण एकोऽनेकश्चेति को नाम नानुमन्यते। कथमेकेनात्मना व्यक्तिः प्रतीयत इति शास्त्रे व्यवहारः। कथं वा यत्र भेदमध्यवस्यत एवाभेदः प्रतीयत इति ग्रन्थः।

सा तु व्यक्तिमाक्षिपतीति परे ।

ननु सामान्यं हि व्यक्तिमन्तरेण प्रतीयते। तस्मात्समानसम्वित्सम्वेद्यैव व्यक्तिः। मैवम्। न हि समानत्वेनैकरूपेण जातिशब्दवाच्या प्रमाणाभावात्। किन्तु स्वरूपेण। न च समानत्वमेवास्याः स्वरूपं तद्धर्मत्वात्। कथमन्यथा आलोचन(ने) प्रतीयते। समानत्वेनाप्रतीता कथं व्यक्तितो भेदेनाभिहिता भवेत्। अनुवृत्तत्वेन जातिर्व्यक्तितो भिद्यत इति चेत्। समानमिदमालोचनेऽपि। तत्र सा भिन्नत्वेन प्रतीयत एव। चरमे त्वनेनाध्यवसायेन पूर्वपिण्डानुसन्धाननिमित्तेन भिन्नरूपग्रहणमिति चेत्, इहापि तर्हि चरममेव पूर्वपिण्डानुसन्धानादेवानुवृत्तत्वरूपं समानत्वमवगमिष्यामः। संस्थानविशेषाभिव्यक्तत्वादाकृतेः, व्यक्तिं विना च संस्थानाप्रतीतेः। कथं विनाव्यक्तिमाकृतिः प्रतीयत इति चेत्, न, अभिव्यक्तिर्हि प्रतीतिजननमुच्यते। यद्य(दा)पि व्यक्त्या आकृतिरभिव्यज्यते, ततः प्रथमं व्यक्तिः प्रत्येतव्या स्यात्। प्रत्यक्षज्ञानं चाकृतेः संस्थानेन्द्रियसन्निकर्ष न ज्ञात(?)तत्सुखमपेक्ष्यते। न तु शब्दे विज्ञाते तथा। अन्यथा लोकाद्यपेक्षाप्रसङ्गात्। गवादिशब्दान्तरे द्वयोरेवत् जातिव्यक्त्योः प्रत्यया सूक्ष्मत्वात्। कालभेदाग्रहाद् भ्रान्ति-

रिति प्रमाणाभावात् । समानवित्तिवेद्यत्वमिति चेत्,न; यथा व्युत्पत्तिशब्दादर्थज्ञानं तद्यदि व्युत्पत्तिपर्यालोचनया क्रमोऽवसीयते । ततो यौगपद्यमेवासिद्धम्, व्युत्पत्तिरेव न तादृशी भवति । अन्यथा कर्त्तुरपि धात्वर्थेन नाक्षेपः स्यात् । शब्दानन्तरं सकर्तृकाया एव क्रियाया अवगमात् ।

ननु न व्यक्तेराक्षेपो युक्तः । स चाक्षेपोऽनुमानं वा स्यात्, अर्थापत्तिर्वा । नाद्यः । गृहीतसम्बन्धानामेव व्यक्तिं विनाप्युपपत्तेः। सदकारणकत्वात् । जातिज्ञानं च व्यक्त्याक्षेपायालम् । न हि तत्र व्यक्तिः कारणं सत्तया । नापि ज्ञाता व्यक्तिर्ज्ञानात् पूर्वमेव जातत्वात् ।

उच्यते । द्वयमपि युक्त(म्) । अनुमान(नं तु)स्तावत् व्यक्तिमात्रस्य सम्बन्धग्रहणात् केन रूपेणानुमानमिति चेत्। अथ केन रूपेण समानवित्तिवेद्यत्वं जात्यैवेति चेत् । तुल्यमप्रेऽपि । कथं जातेर्जात्यैव रूपेणानुमानं भेदाश्रयत्वात् लिङ्गलिङ्गिभावस्येति चेत्, समानं; समानवि(चि)त्तिवेद्यत्वस्य रूपाभेदेऽपि रूपिणो भिन्नत्वाद्दयमदोष इति चेत् । ममापि तुल्यम् । अर्थापत्तिरप्यत एव युक्ता ।

न हि कारणमेव विना कार्यस्यानुपपत्तिः । किन्तु यद्येन व्याप्त(प्तं)बुद्धिना तस्यानुपपत्तिः । व्याप्त्यावजातिर्व्यक्त्येति कथमर्थापत्तिर्न युक्ता स्यादिति ।

अत्रोच्यते । न जातिः केवला प्रतिभानमर्हति । स्वरूपत एव परतन्त्रत्वात् । स्वतन्त्रं हि वस्तु केवलं प्रतिभासते । घटादिवत् । यद्यत्परतन्त्रवृत्ति तत्तस्मिन्नेव प्रकाशमाने प्रकाशते । यथार्थप्रकाशन एव ज्ञानप्रकाशः, परतन्त्रा चेयं जातिः प्रत्यक्षादवगम्यते ।

अत एवोक्तम्, कः खल्विह गवि गोत्वमिति प्रतीतिमभ्युपगच्छेत् । अन्यत्र निविष्टस्तत्र पार्यन्त्राणादिति । इदंता परामर्षमस्त(त्र)स्वतन्त्रं प्रतीयते, तच्च द्रव्यमेव । अत एव शाब्दाः पठन्ति कृदभिहितो भावो द्रव्यवत्प्रकाशते । अत एव गुणा अपि गोत्वशब्दरहिताः परतन्त्रा एव यदभिप्रायेणोच्यन्ते । स(सं) युक्ताविमाविति हि प्रतियति हि । न पुनरयमनयोः संयोगः । नन्वेवं गोत्वाद्याकृत्याशब्देभ्यो जातिस्तथैव प्रकाशेत । तत् स्वभावात् शब्दस्वभाववैचित्र्यनिबन्धनोऽयं प्रतीतिभेद इति चेत्, सत्यमिदं नास्माकं कारणे प्रश्नो जातौ त्वेकस्वभावायां कीदृशः प्रतीतिभेद इति पृच्छामः । गोशब्दाद्व्यक्तिरपि प्रतीयते नाकृतिशब्दादिति शब्दस्वभाव इति चेत्, स्वीकृतं तर्हि व्यक्तेर्वाच्यत्वम् ।

उच्यते,गोत्वादिशब्दा हि द्रव्यगतं स्वातन्त्र्यमुपस्थाप्याऽऽकृत्या सहाभेदाग्रहादाकृतौ स्वतन्त्रव्यवहारं प्रवर्तयन्ति । तेन गोत्वादिशब्देषु व्यक्तिः परतन्त्रा, आकृतिः स्वतन्त्रा इत्यवभासः । गवादिशब्देषु तु विपरीतम् । नचैवं गोत्वादिशब्दानां विप्रलम्भकत्वमिति वाच्यम् । आहार्यत्वात् स्वातन्त्र्यस्य । तद्यथा शिलापुत्रकस्य शरीरं शोभनमिति ज्ञानं उष्णं जलमिति वा न विसंवादयति, तथैतत् यथा च दधि विवीयते (विधीयते) दध्नः स्वातन्त्र्येण विधानप्रत्ययेऽपि पारतन्त्र्यव्यवहार एव तात्पर्यकत्वान्न विसम्वादवाक्यत्वम् । तथेहापि ।

स्वातन्त्र्याक्षेपः किमर्थमिति चेत्, न; विविक्तप्रत्ययार्थमेव । अन्यथा दधिहोमो विधीयत इत्यभिधाने दधिविशिष्टहोमविधिमेव कश्चिदवगच्छेत् ।

नन्वेवं क्रियाया अपि कर्तृकर्मनिरूपणीयत्वात् । ज(य)जे(र्)द्रव्यदेवतानिरूपाणीयत्वात्, करणत्वादीनां च (वि) क्रियानिरूपणीयत्वात्, समानवित्तिवेद्यत्वप्रसङ्गः ।

भवत्वेवं, को दोषः । कथं तर्हि क कर्मणोराक्षेप इति चेत्, विभक्तस्य कत्रा(र्त्रा)देर्ज्ञानसापेक्षत्वादिति ब्रूमः । यथा ह्यविदेशागतः पदार्थों विविक्तपदार्थान्तरेण संयुज्यते तथैतत् । अत एव यत्र व्यक्तेर्विभक्ताया एवार्थान्तरसम्बन्धो विवक्षितस्तत्र व्यक्तिर्लाक्षणिकैव भवति । यथा ग्रहं सर्माष्टींत्युद्देशे ।

नन्वेवेज्जा(न्वेवं जा)तिव्यक्त्युभयविषया संवित्, तस्यां च शब्दः कारणम् । ततो व्यक्तिरपि वाच्या स्यात् । न ह्यर्थभेदे पृथक् शब्दानां शक्तिर्ज्ञानशक्तेरेवार्थशक्तित्वव्यपदेशात् । सत्यम्, त(त्) ज्ञानं हि द्व्यंशं तत्रैकस्मिन्नंशे शक्तिरित्युच्यते । तद्यथा प्रत्यभिज्ञाने तत्तांश एव संस्कारस्य शक्तिर्नेदमंशे ।

नन्वेवं व्यक्त्यंशस्याकारणत्वं स्यात् । जात्यंशकारणक इति मावोचत्तु समानकालत्वात् । अवर्ज्जनीय इति चेत्, कदाचित्कस्याकारणकत्वप्रसङ्गात् । अवर्जनीयापरिज्ञानात् । यथा शब्दस्य ज्ञानात्मत्वस्वात्मप्रकाशे शाब्द(बोध)स्य शक्तिर्नास्ति । अथ च तौ प्रकाशेते, तथा व्यक्तिरिति चेत्, न; तयोरपि शक्तिमन्तरेण प्रकाशाभावात् शाब्दज्ञानविषयत्वाभावात्तयोर्नाभिधेयत्वव्यपदेशः । सकलप्रमाणसाधारणेन रूपेण तत्र शब्दो व्याप्रियत इति तयोर्नाभिधेयत्वम् ।

इहापि सकलस्य जातिज्ञानकारणस्याऽयं स्वभावो यद्व्यक्तिज्ञान-जनकत्वं प्रत्यक्षादिष्वपि तथा दर्शनात् । अतो नाभिधेयत्वमिति चेत्, न, नहि प्रत्यक्षे जातिज्ञानकारणाद्व्यक्तिज्ञानजन्यं (जननं) जात्यज्ञानेऽपि व्यक्त्यज्ञानात् । जातिज्ञानकालेऽपि च तस्यैव कारणत्वेनाक्लृप्तत्वात् । जातिज्ञानहेतोश्च संयुक्तसमवायस्य संयोगाव्यभिचारित्वेन जातिज्ञानस्यापि व्यक्तिज्ञानाव्यभिचारित्वसिद्धेः ।

अनुमानेऽपि च जातिविशिष्टाया एव व्यक्तेर्व्याप्त्यङ्गीकारात् । व्यक्त्यवगमस्यासिद्धेः, न, सकलजातिज्ञापकसाधारणी शक्तिः क्लि (क्लृ) प्तास्ति । सकलजातिवाचकसाधारणेयं व्यक्तिरतो वाच्यत्वव्यपदेशः, गौणलाक्षणिकयो (योः) सकलशब्दसाधारणशक्तिविषयत्वे सत्यपि यथा नाभिधेयत्वम्, अन्यथा शक्तत्वात् । प्रतीत्यनुपपत्तेरिति चेत्, न; अस्य परिभाषामात्रत्वात् ।

विन्ध्यवासिमतेन समं वस्तुतोऽविशेषात्। इदानीमेवं(व) शक्तिकल्पनेनागृहीतविशेषणान्यायव(वै)धुर्यात्। पर्यायशब्दानां च साधारण्येनावाचकत्वप्रसङ्गात् अर्थशक्त्यैवोपस्थितयोर्गौणलाक्षणिकयोः शब्दान्तरजन्यान्विताभिधानप्रवेशोपपत्तौ शब्दशक्तिकल्पनाविरहेण दृष्टान्तस्य साधनविकलत्वात्, अस्त्येव व्यक्तौ शक्तिः। सा तु न ज्ञाता, कारणं, जातिशक्तेरेव तु ज्ञानमुपयुक्तम । जातिशक्ति ज्ञा(ज्ञा)नस्य हि यदि कारणा (णं) न स्वीक्रियते, ततोऽव्युत्पन्नस्यावगमः स्यात् । इह तु जातौ व्युत्पन्नस्य व्यक्तिज्ञानं न जायत इति व्यभिचाराभावात् । न व्यक्तिविषयाया अपि शक्तेर्ज्ञानकारणत्वमिति, सामान्यकल्पने प्रमाणमस्ति ।

तस्मात्, विज्ञातशक्तिशब्दजनितज्ञानविषयत्वलक्षणं वाच्यत्वं व्यक्तेर्नास्तीति उक्तमिति चेत्,न; अस्यापि भाषामात्रत्वात् । शक्तिस्वीकारेऽनावगतविशेषणान्यायविरहात् । शब्दस्य च शब्दज्ञानोचिता शक्तिर्ज्ञाता कारणमिति सामान्यकल्पनयोपपत्तौ जातिविषया ज्ञाता व्यक्तिविषयाऽज्ञातेति विशेषकल्पना(या) एव गुरुत्वात् । व्यक्तिवाचिनामपि व्यक्तिशक्तिज्ञानस्यापि कारणत्वाङ्गीकारात् । जातेरेव सम्बन्धावधारणकाले व्यक्तेरपि दृष्टत्वात् । तज्जनितसंस्कारशब्दाभ्यां सम्भूयोभयज्ञानं जन्यते । अतः समानवित्तिवेद्यत्वमपि स्यात् । व्यक्तं(क्त्यं)शे संस्कारस्यैव व्यापारा(रत्वा)दिति चेत्, न; संस्कारोद्बोधे नियमकल्पनमिति चेत्, न; अनियतहेतोर्नियमकल्पनस्य प्रमाणविरुद्धत्वात् । कथं तर्हि धेनुशब्दा-

न्नियमेन गोत्वस्मरणं तस्या वाच्यत्वेऽपीति चेत्, न; तस्य व्युत्पत्त्युपलक्षणत्वेनावश्यस्मर्तव्यत्वात् ।

उच्यते, यद्वस्तु यत्परतन्त्रं तद्बोधिकासामग्री तदपि बोधयतीति सामान्यत एव क्लि(क्लृ)प्तम् । कथमन्यथा पुंवाक्यादिभिर्ज्ञानेऽनुमाने तस्मिन्कालेऽर्थोऽपि प्रकाशेत । अर्थस्यापि व्याप्तत्वादिति चेत्, न, अर्थेन समं पुंवाक्यस्य कार्यकारणत्वविरहात् । ज्ञानद्वारकः सम्बन्ध इति चेत्, तर्हि ज्ञानसमत्वयोर्थानुमानं न स्यात् । अविशिष्टमेव ज्ञानमनुमीयत इति चेत्, न, अर्थस्याकारणत्वात् । विशिष्टस्य कारणत्वविरहात् । तर्कोपस्थितस्तदानीमर्थ इति चेत्, न; नियमस्याप्रामाणिकत्वप्रसङ्गात् । तस्मात् (तस्मात् is omitted) यत् परतन्त्रा ज्ञानेच्छाशक्त्यादयो येन प्रतीयन्ते तस्यायं स्वभावो यत्स्वतन्त्रमपि गृह्णातीति वाच्यम् । जातिश्चेयं व्यक्तिपरतन्त्रेति जातिग्राहिणापि व्यक्तिग्रहणं स्वभाव इति क्लि(क्लृ)प्तमेव । प्रत्यक्षेण तु प्रमाणसमाहारो भवति प्रातिस्विकस्यापि व्यक्तिज्ञानकारणस्य विद्यमानत्वात् । इह तु जातिग्राहिणैव शब्देन व्यक्तिः प्रतिपाद्यते न त्विदानीं शक्तिः कल्प्या (ल्प्यां) । अतएव न शक्तिज्ञता व्याप्रियते।साधारणत्वात्। अतो न व्यक्तौ रु(उ)पयुक्ता(क्तता)शक्त्यवधारणस्य व्युत्पत्तित्वात् । यादृशं च परतन्त्रे ज्ञानं तादृशं स्वतन्त्रेऽपीति जातिव्यक्तेरपि शाब्दत्वम् । अभिधेय एवार्थे शब्दानामौत्सर्गिकं तात्पर्यमिति विभक्त्यापि कारणत्वादिकमुच्यते, इति जातेरेव वै विनियोगिकमङ्गत्वं तत्तु व्यक्तेः साधनत्वमन्तरेण नोपपद्यत (ते) इत्यौपादानिकं व्यक्तेरङ्गत्वं भवति। एवं पशादिसङ्ख्यासम्बन्धोऽपि जातेरेव सम्प्रदानत्वादिकमपि केवलाया जातेर्न निर्वहतीति न व्यक्तिसमाश्रयणे निर्वाह्यते । एवमन्यत्वम् ।

अत एवाकृतौ शब्दार्थे श्येनचितं चिन्वीतौ घटते (घटेते) अत्र हि कर्मण्यग्न्याख्यायामिति स्मरणात् । श्येनश्चीयत इति श्येनवित्पदार्थः । न च चीयमानस्थानस्य श्येनत्वं युज्यत इति श्येनशब्दो गौणार्थः । न चैकस्याः कस्याश्चिद्व्यक्तेः सादृस्य(श्य)माद्रियते। यद्यपि जात्या सादृश्यमिह यमेव तत्र चितिव्यक्तेर्न भवति । मूर्तामूर्तयो(योः) सादृश्यविरहात् । तथापि जातिविशिष्टेन व्यक्तिमात्रेण सादृश्यसम्पादनादस्ति जातिसादृश्यमित्येव च जातेः कारकत्वमित्युक्तं भवति ।।

उत्कंसमादेयसामर्थ्यम्(१।४,१)उद्भिदा यजेतेत्यादिषु संशयः। किं गुण-

विधिः। किं वा नामधेयमिति। अत्र मन्त्रार्थवादत्वासम्भवादिभिरुद्भिजादयो गुण-विषयः, गुणश्च ज्योतिष्टोमे विधीयते। अगत्या तदेकं वाक्यं विशिष्टकर्मविधायक-मिति परेषां पूर्वपक्षः ।

तदयुक्तम् । एवमतिप्रसङ्गात् । न च ज्योतिष्टोमे गुणविधिर्युक्तः तद्वाक्यस्यापि सोपपदत्वात् । न च विशिष्टविधिः, वैपरीत्यस्यापि सम्भवात् । न च प्रकृततया विशेषः पूर्वपक्षे, तदभावात् । न च विशिष्टे कर्मणि विहिते तत्र वाक्यान्तरेण गुणविधानं युक्तम् । उत्पत्तिशिष्टगुणावबोधात् । तस्मात्सर्वैरेव वाक्यैर्लौकिककर्मणि गुणविधानमिति पूर्वः पक्षः ।

तथा च प्रधानविधिविधेयत्वादङ्गानां गुणकर्तव्यतापि प्रमाणान्तराधीनेति सापेक्षतया न शब्दः प्रमाणमिति सङ्गतिः ।

ननु लोके यागाभावात् चोदितोपहितत्वादेवताभावस्य कथं गुणविधिः । सत्यम्, अत एवाभासप्राप्त एव बौद्धाद्यागमगम्य-गुणयागे गुणविधिः । न च तस्याभासत्वादेव न तत्र गुण विधिरिति वाच्यम् । गुणविधेरपि पूर्वपक्षत्वाभासत्वात् । यथा च स्मृत्यधिकरणपूर्वपक्ष आभासप्रतिपन्न एवाष्टकाकर्मणि विनियोगः । तथात्र पक्षानुरूपत्वाब्दलेः, न च तस्याभासत्वादेव गुणविधिपरित्यागः । प्रामाण्यस्याव्युत्पन्नत्वात् । अत एव लौकिके कर्मणि गुणफलविधया प्राङ्मुखोऽन्नानि भुञ्जीतेति चाप्रामाण्यमिति निरस्तम् । आश्रय-स्याभासत्वात । न च भ्रमानुष्ठितोप्याश्रय आस्तामिति वाच्यम् । तस्य परमार्थतो याग(त्व)विरहात् । याग इव ह्यसौ प्रतीयते । न त्वयं याग एव चोदितत्वोपा-धिरपि तत्र देवताभ्रमप्रतीतेव ।

अन्ये तु—लोके यागाभावाद्यजिना त्यागमात्रमेव लक्षयित्वा गुणविधि-रित्याहुः ।

नन्वेवं त्यागाश्रित उद्भिदादिः फलाय विधीयतामिति प्रामाण्यमेवास्तु ।

तत्र केचिदाहुः—न सर्वत्र वाक्ये फलपदमस्ति । अतः फलपदशून्ये तावद्गुणफलविधितया प्रामाण्यमतोन्यदप्रामाण्यमेव । तन्न । तत्रापि नियोगप्रतीत्यभङ्गाय सिद्धान्त इवाधिकारकल्पनेन । गुणफलविध्युत्पत्तेः अपि चात्रापि प्रतिग्रहादिवन्नियोगविषयत्वमिति चेत्, तुल्यं, नामोपात्त-प्रतिग्रहादौ धनार्जनमेव । तत्र विभक्तो विषय इति चेत् । तुल्यमत्रापि ।

विवेकस्तु, अस्तु रागप्राप्तभोजनाश्रितप्राङ्मुखत्वनियमविधिः। इह तु (इह तु omitted) प्रथमं यागे रागतोऽप्रवृत्तेर्न पुरुषार्थतेति। किं तु रागोद्भिन्नसम्बन्धपरतैव। तदा तु पश्चाद्यागवियागाभावनिश्चयात्। त्यागलक्षणायां रागतः प्राप्तिमतिसन्धानेऽपि न प्रथमापगतपुरुषार्थतया वर्णनमिति, तन्न, एवं सति यागस्याप्राप्तेर्वेदेन प्रथमं गुणविधिता न सम्भवतीति कथं वरमं (चरमं) गुणविधित्वाश्रयणमिति।

श्रीकरस्तु, असन्निहितत्वाल्लौकिककर्मजो न तत्र गुणफलविधिरित्याह। तन्न। गुणविधेरपि सन्निहिताश्रयत्वात्। यथा त्वगत्या क्वचिदपि गुणविधिः, तथात्र गुणफलविधिरस्तु। न्यायस्य तुल्यत्वात्।

उच्यते, यथा विशेषविधिः पूर्वपक्षे नास्ति तथा गुणफलविधिरपि गौरवदोषात्। गुणफलविधावपि नियोगोऽधिकः प्रतिपादनीय एव। न तु गुणविधौ। ननु विशिष्टयागविधिरेव किमिति न भवति। गौरवदोषान्मत्वर्थलक्षणायाश्चेति चेत्, एवं सति सिद्धान्तेऽपि यत्र नामत्वं नास्ति तत्र विशिष्टविधिर्न स्यात्। गुणविधियोगस्यानवरुद्धस्य भावार्थस्याप्राप्तौ लौकिके गुणविधानादप्रामाण्यं प्रसज्येत(त)। न चागत्याविशिष्टविधिं सिद्धान्ती पश्यति न तु पूर्वपक्षीति साम्प्रतं न्यायान्तरव्युत्पाद्यत्वाद्विशिष्टविधेः स्वसिद्धान्तं पूर्वपक्षी न पश्यति राद्धान्तराधीनन्यायान्तरलभ्यं वा। न चात्रसिद्धान्ते विशिष्टविधिर्व्युत्पाद्यते। न च नामव्युत्पादनापेक्षं तदुपादानम्।

उच्यते। एवं पूर्वपक्षी मन्यते विधेयार्थपदत्वदेशकेनैव सम्बध्यते। न तु पदान्तरेण सम्बन्धाभावप्रसङ्गात्। उद्दिश्य हि किं विधीयते अतो नामत्वं न भवति। न हि नामपदं विधेयस्य उद्देश्यमर्पयति।

अयं च पूर्वपक्षेहे(हे)तुविशिष्टविधिनिराकरणेऽपि तुल्यः। तत्रापि द्वयोः पदयोः उद्देश्यविधेयार्थत्वविरहात्।

सिद्धान्ते त्वनुद्देश्यकमपि पदं विधेयत्वेन सम्बध्यते इति व्युत्पाद्यते। तथाच विशिष्टविध्यसम्भवात् सम्भूयबोधार्थं नामत्वसम्भवाच्च नामत्वं सम्भवति। अत एवसिद्धान्ताधीनत्वाद्विशिष्टविधेः, न पूर्वपक्षे विशिष्टविधिरस्ति। अत एव गुणफलविधिरपि पूर्वपक्षे मा(प्र)त्यङ्मुखत्वादावपि नास्ति, तत्राप्याश्रयपदस्यानुद्देश्यकत्वात्। अत एव इदं निरस्तम्।

यत्रोभयगुणश्रवणं तत्र तावद्विशिष्टकर्मविधानमेवेष्टव्यम्। अतस्तदुद्देशेनैवेतरे गुणविधयः सन्तु।

उत्पत्तिविशिष्टगुणविरोधोऽपि विकल्पोस्तु। विषमविशिष्टयोरप्यगत्या विकल्पाङ्गीकारात्। काम्यत्वाद्वा उत्पत्तिविशिष्टस्य बाधोऽस्त्वित्यादि, यतो विशिष्टविधिर्न(धिं न)पश्यत्येव पूर्वपक्षी तद्वरमागत्या वाक्यभेद एवास्तु शब्दस्वभावपरित्यागात्। वाक्यभेदस्यैव न्याय्यत्वात्। तस्माल्लौकिके गुणविधानादप्रामाण्यमस्तु।

सिद्धान्तस्तु, सर्वत्रैव वाक्यभेदार्थ एव विधीयते। स तु यदास्वरूपेण सन्निहितः प्राप्यते तदा स एव गुणविभक्तो विधीयते। इह तु सन्निहितस्य यजेरभावाद्याग एव विधीयते। तदा न गुणोप्यपरो विधीयते। मत्वर्थलक्षणादिदोषात्। तस्मान्नामत्वमेव। न चैवं विध्युच्छेददोषः। यत्र मत्वर्थं विनैव विशिष्टविधिसम्भवः प्रवृत्तिनिमित्ताभावाद्वा नामत्वासम्भवः, तत्र तदङ्गीकारात्।

किं पुनरिदं नामत्वम्। प्रातिपदिकत्वमिति चेत्, न; गुणविधि(धे)रपि सम्भवात्। कर्मप्रतिपादकं नामेति चेत्, न; एवं सति गुणस्येदं नाम गुणकर्मणो वेति सन्देहप्रसङ्गात्। तत एवा(व)पूर्वपक्षेपि बहुव्रीहिणो होमप्रतिपादनान्नामत्वं स्यात्। अनुवादत्वे नामत्वं न विधित्वमिति चेत्, न; सर्वेषामनुवादानां नामत्वप्रसङ्गात्। न च नाम करण एव भवति। यूपादि पदानामपि नामत्वेनान्वयात्। अत एव सप्तमे संस्कारान्नाम्नातिदेशकत्वं दर्शितम्। एतत्पादप्रतिपाद्यस्यैव नाम्नस्तत्रातिदेशकत्वमुच्यते। अत एवाह गुणविधिस्तु न गृह्णीयादिति। कथं च नामापि गुणपर(क)त्वे नार्थवदित्युच्यते। न ह्येकस्मिन् वाक्ये विश्वजिजा(दा)दिपदानां तत्परत्वमवगतम्। ततो विश्वजित्सर्वपृष्ठो भवतीत्येवमादि वाक्येऽपि तेन तत्परेण भवितव्यम्। तत्र यजिविशेषणसामानाधिकरण्याभावात्। तत्रापि सन्निधानादिति चेत्, न; व्यवधानेऽपि सर्वलक्षणायां दर्शपूर्व(र्ण)मासाविष्वा(ष्ट्वा)सोमेन यजेतेत्यादौ च विशेषपरताङ्गीकारात्। बहुसन्निधौ च विशेषबुद्धौ सन्निधेरनुपयोगात्। सन्निधानादेव च विशेषपरत्वे नाम्नस्तत्प्रयोजनत्वासम्भवात्। अन्यत्रापि तत्पदोच्चारणे तत्प्रतीतिरेव भवत्वित्येवंप्रयोजनकोनुवाद एव नामत्वेनान्वय इति चेत्। न। तत्र सामर्थ्याभावेनानुवादस्य तत्प्रयोजनकत्वासम्भवात्। न हि यदैकेन शब्देनानुदितं तदन्यत्रापि तेन

शब्देन वक्तव्यमिति कारणमस्ति। अभ्युच्चयश्च गुणफलोपरन्धेन प्रयोजनत्वं नामत्वं अन्यथा तद्विना नामत्वमेव न स्यात्। अपां(पा)व्यु(ह्य)त्सेकस्यावभृथपदेनानुवादादेवावभृथपदं नाम स्यात्। सा गौणी श्रुचिरिति चेत्। गौणत्वेनापि नामत्वानपायात् श्येनादिवत्। सोनुवादस्तत्प्रयोजनो न भवति। किं तर्हि? वस्तुप्रयोजनक इति चेत्। न। तत्प्रयोजनकत्वाभावेप्यर्थवादोक्तायोगादाज्यादिषु नामत्वाङ्गीकारात्।

अथ यद्येकत्र प्रयुक्तस्यान्यत्रापि तत्प्रतीतिसामर्थ्यजननमिति स्वभावः, तदा तत्प्रयोजनमन्तरेणापि नामत्वप्रसङ्गात्। यदि च नायं स्वभावः, तत् कथं तत्प्रयोजनमपि स्यात्। जन्यं हि प्रयोजनम्, अन्यथातिप्रसङ्गात्।

यत्र संज्ञापदं तत्र नामत्वमिति चेत्, न; मन्त्रेणापि नामत्वप्रसङ्गात्। तया संज्ञया यजेतेति च तदान्वयः स्यात्। ततश्च संज्ञाविशिष्टविशिष्टविधिना (धानात्) विशिष्टविधिरेव स्यात्। संज्ञायाश्चा(श्चां)गत्वं स्यात्। गुण एव च संज्ञानिवेशात्। पृथक् संज्ञाया(याः) शास्त्रभेदकत्वं स्यात्। संज्ञान्तरं च तदभिधायकं प्रयोगकालेन प्रयुज्यते। तस्या एव संज्ञाया नियतत्वात्। संज्ञात्वं च यागविशेषं प्रति उद्भिदादीनामप्राप्तमिति कथं निश्चयः स्यात्। वैय्यधिकरण्ये न चैवमन्वय इति पुनरपि मत्वर्थलक्षणा स्यात्।

श्रोत्रप्रत्यक्षोपस्थापयितायाः संज्ञाया अन्वय इति चेत्, भवतु, किं त्वयं मन्त्रविधात्,तृतीया चेदानीं संज्ञाया एव करणत्वं प्रतिपादयेत्। प्रतिपादकस्य स्वपरत्वात्। प्रातिपदिकार्थस्य मुख्यत्वात्। संज्ञिगतमेव करणत्वं भवेत्। सर्वत्रैवं पदे संज्ञा तेनान्वयः स्यात्। न त्वत्र कश्चिद्विशेषः संज्ञीव तस्मात्परात् केन रूपेण प्रतीयते। यद्यवयवानुयोगितया ततस्ताद्रूप्येण विधेयत्वाद्विशिष्टविधित्वमेव स्यात्। तद्रूपानुवादश्चेत्, प्रागुक्तमत्रोत्तरम् सर्वत्र तत्प्राप्यानां नामत्वं स्यात्।

अत्रोच्यते, यदा गुणवि(धि)विशिष्ट (विधानं) विधी न संभवतः (संभवति) तदा लोकप्रसिद्धेनार्थेन पदस्य प्रतिपादितत्वासम्भवात्। वेदादेव व्युत्पत्तिरवधार्यते। तत्र यजिसमानाधिकरण्यात् यागविशेषवाच्ययं शब्द इति प्रसिद्धपदसामानाधिकरण्यलक्षणया व्युत्पत्त्यार्थापत्तिरवधारयति। सामान्यविशेषवाचिनोरेव सामानाधिकरण्यात्। कश्च यागविशेषो वाच्य इति

प्रथमं नावधार्य्यते । किं त्वनध्यवसित एव व्युत्पत्तिः, यथा व्युत्पत्तिरवगता तथैव प्रतिपादकत्वं भवति । तेन व्युत्पत्तिबले एतन्नामकं किञ्चित् कर्मेति सामान्यतोऽवधारणात् ।

यद्यपि यजिशब्दोपि विध्युपबन्धात् विशेषमेवोपस्थापयति तथापि तेन कोऽपि याग उपनीयते । उद्भिद(त्)पदेनोद्भिन्नात्मकसम्बन्धकालावसितेनैवोपलक्षणेन, ततश्चायमन्वयो भवति उद्भिन्ना(न्ना)त्मा यागेनेति । तद्यथा करभमानयेति करभशब्दे व्युत्पत्तिशून्यः सामान्यत इदं प्रतिपाद्यते करभपदवाच्यं किमप्यानेतव्यं ममायमाहेति । यश्च व्युत्पन्नः (स) पशुविशेषोऽस्य वाच्य इत्येतावन्मात्रे तस्यापि करभनामा पशुविशेष आनेतव्य इति प्रतीयते । यः पुनः क्रमेण व्युत्पन्नः स संज्ञोपलक्षणपरित्यागे व्यवसितमेव वस्तु प्रत्येति ।

कथं पुनरेकया शक्त्या विभिन्नाः प्रतीतयो भवन्ति । न । प्रतीतेरेकार्थविषयत्वात् । अध्यवसायानध्यवसायाभ्यां विशेषः । उपलक्षणसम्बन्धकालेऽवसितमनध्यवसायप्रतीत्या रूढं भवति । तस्मादत्रापि विश्वजिन्नाम्नेत्येतावन्मात्रप्रतीतिः ।

यत्तु व्यवहारवाक्यं विश्वजित्सर्वपृच्छत्य(पृष्ठ) इति तस्य विश्वजित्पदाद्यद्यपि नाध्यवसायः, तथापि तद्वाक्यविधेयो यागविशेष इत्येवं तत्रान्वय इति न नामत्वेन नान्वयः, उत्पत्तिवाक्ये तु न ताद्रूप्येनापनयो यजिना समं भिन्नरूपान्वयपरत्वभङ्ग प्रसङ्गात् । यद्यपि संज्ञोपलक्षित एव संज्ञी व्यवहारवाक्ये प्रतीयते, तथापि तत्र नामत्वेनान्वयः । संज्ञात्वप्रतीतिपरं हि यत्रोच्चारणं तत्र नामत्वम् । न त्वेकस्मिन्नेव वाक्येन सर्वस्मिन् । तथा हि विश्वजिता यजेतेति यदि विश्वजित् पदं न स्यात् तथापि यागोनुष्ठीयेत । विशेषानुष्ठानं नाम इति चेत्, न; नामतो विशेषानध्यवसायात् । विशेषाध्यवसायस्तु द्रव्यदेवतादिविधायकैरेव प्रमाणैः । किन्तूत्पत्त्या संज्ञासंज्ञिसम्बन्धो यो बोधनीयः, तदेवोच्चारणप्रयोजनं, तस्मिन्नवगते तन्नामचिह्नितैर्वाक्यैः प्रका(क)रणादिवशेन वा तेषु तेषु विहितेषु गुणेषु तादृशे कर्मणि सैव व्युत्पत्तिरध्यवसिता भवति । न च तत्रापि व्युत्पत्त्यवधारणम् । येन सर्वस्मिन्नेव वाक्ये नामत्वं स्यात् ।

सा चेयं व्युत्पत्तिस्त्रिधा । शक्त्यवधारणमुपाधिकल्पनं गौणलाक्षणिकयोर्निरूढिकल्पनं चेति । तत्र यूपं छिनत्तीति सर्वथा लोकाव्युत्पत्तेः शक्तिरेव कल्प(ल्प्य)ते । प्रमाणाभावात् । संस्कृतोद्देशेन संस्कारविधिवैकल्यात् ।

तस्माद्यूपनामकं किञ्चिदस्तीत्यवगमः । तदुद्देशेन छेदादीनां साधनत्वेन विधानात् । तज्जन्य एव संस्कारविशेषः शब्दवाच्य इति चरममध्यवसानम् । तत्संज्ञापनं च यूपपदप्रयोजनं, न तु द्रव्योद्देशः । छेदसामर्थ्येनैव सामान्यत उद्देश्यद्रव्यलाभात् । संज्ञाज्ञापनस्य यूप उक्त इति यत्र छेदनं तत्रैवाञ्जनमिति गुणोपबन्धः प्रयोजनोऽपरोऽर्थस्तु यूपे बध्नातीति। एवमाहवनीयेऽपि शक्तिकल्पनेनैव नामत्वं किं त्वनुवादे 'स एव आहवनीयो भवति' इति श्रूयते। शब्दज्ञाप्यमेव संज्ञार्थम्, तत्र उपदेशादेव व्युत्पत्तेर्विष्णुर्नारायण इतिवत् । यथा हि तत्र यो विष्णुः स नारायणनामक इति ज्ञाप्यम् । तथात्रापि य आहितः स आहत (आहवनीय) नामक इति पदार्थः । विधायकं च वाक्यद्वयं कर्तुं न शक्नोतीति तदर्थापत्त्या व्यापारेण नामत्वे व्याप्रियते अत आहवनीयवाक्यं परमार्थतो नानुवादः । किं तु संज्ञाज्ञापनमेवं भावकस्यानुवादकत्वात् । न चैवं सिद्धार्थत्वादेव प्रामाण्यम् । 'यदाहवनीये जुहोती'ति प्रयोजनोपरुन्धवाक्येन सममेकवाक्यतया विध्युद्देशरूपत्वात् तथा च नारायणस्य पुत्र इत्येतस्मिन् नारायणपदं न नारायण(ये) नामक इत्येवंपरतयाऽऽहवनीये जुहोति । अरूपं परमेव तस्माद्यूपाद्यपि नामधेयम् । अत एव नामधेयादिमध्ये बर्हिराज्यादिविचारः ।

यत्तु यौगिकमग्निहोत्रादि पदं तस्यापि होमविशेषं प्रति नामत्वापरिज्ञानात् । तन्नामत्वार्थमुपाधिरत्र कल्पते । येन तत्प्रतीतिरेवान्यत्रापि उच्चारणे भवति । पङ्कज इव कमलत्वं एवमाप्यादिपदेष्वपि ।

केचित्तु अर्थवादानामसत्यर्थेत्याभासौ(त्यार्थत्वाभासौ) परमार्थतो योगः। किं तु नामधेयतां ज्ञापयन् परमार्थवादो व्युत्पत्तिकारणं निरुक्तकारस्येव गच्छतीति गौरिति व्युत्पत्तिकारणं रूढिरेव न तु परमार्थः । अर्थवादे यौगिकत्वोपचारात् । ग्रन्थोपि तथोपचारः । चित्रापौर्णमास्यादिपदं तु मुख्यया वृत्त्या कर्मण्येव(न)- वर्तितुमर्हति सुतरां तद्विशेषे । किं तु लक्षणया कर्मणि वर्तते । तत्रापि विशेषप्रीत्यर्थं लक्षणायां नियामक उपाधिः स्वीक्रियते या खलु निरूढिरित्युच्यते । एवं गौणेपि इमाश्च शक्त्युपाधिनिरूढयो नामत्वेनान्वयकालेन विशेषतो व्याप्रियन्ते । किं त्वेतन्नामकं किञ्चिदिति परं ज्ञानमुत्पादयन्ति,व्यवहारकाल एव तु विशेषतो व्याप्रियन्ते । अत एव नामधेयकाले न लक्षणादिदोषः। अत एव 'राज्यैः स्तुवीत' इत्यत्रैव नामत्वेनान्वयः । 'पञ्चदशान्याज्यानि भवन्ती'ति स्तोत्रस्वरूपोद्देशपरमेव । अतश्चित्राधिकरणे व्यवहारनिरूपणम् । अत एवोत्पत्तिवाक्येपि यच्चि-

त्रापदमस्ति तच्च नामत्वेनान्वितमितिकृत्वा चिन्तामेति प्रामाणिकः। अत एवाग्नि-माधिकारवाक्यमुदाहरणं तत्र नामत्वेनान्वयाभावात्। किन्तूत्पत्तिवाक्यमेव।

यद्यपि च लिङ्गो व्युत्पत्तिरपूर्वे वेद एव कल्पते, तथापि प्रथमविशेष एव कल्पनात्। अभिधानकाले स्वरूपेणैव अर्थोनुपनीयते। तत्र स्वरूपपर एव शब्दो न नामनामिपर इति न नामत्वेनान्वयः।

यत्र तु संज्ञोत्तरकालं विशेषनिरूपणं, तत्र नामत्वेनान्वय इति मन्तव्यम्। अत एव संज्ञाप्रवृत्या संज्ञाश्रुतितुल्या भवतीति यजेः प्रकरणात् सर्वपरत्वं वारयति प्र(अ)वर्त्यात्वविशेषाप्रतिपादकत्वात्। तस्मिन्काले तत्र योगव्यापारा(रो)स्य श्रुतिरूपा किन्तु यौगिकत्वे प्रवृत्तिनिमित्तं लाघवमवतारयन्ती समाख्या रूपा भवति। अत एव सा प्रकरणेन सर्वग्राहिणा बाध्यते।

ननु गतिरियं यत्पदादनध्यवसितोर्थ(र्थः)प्रतीयते, अध्यवसाये सम्भवति, अनध्यवसायस्यापि योगात्। प्रसिद्ध्यैव व्युत्पत्त्या प्रतिपादेन(दनं) सम्भवति (तीति) न व्युत्पत्तिकल्पनं युक्तम्। तस्माद् गुणविशिष्टभावार्थविधिरेव युक्तः। सत्यम्,किन्तु विशिष्टविधौ मत्त्व(मत्वर्थ)लक्षणादिदोषादिदमध्यवसितम्। न च लक्षणां विना विशिष्टविधानं युज्यते वै(नै)रूप्यमसङ्गादिति।

वाजपेयाधिकरणविषयः। तथा हि यजिशब्देन फलं प्रति साधन-त्वेनोपादेयत्वेन चार्थः समर्थनीयः। गुणं प्रति तु साध्यत्वेनोद्देश्यत्वेनानुपादेयत्वे-नेति वैरूप्यम्। न चोभयात्मने(नै)वोपनयनं युक्तम्। तथा सति द्वयोरेव गुणफलयो रूपद्वयानन्वयाद् गुणफलपरत्वव्याघातप्रसङ्गात्। फलं प्रति साधनत्वं नैयोगिकम्। नत्वाभिधानिकम्। अतो न वाक्यभेदः।अन्यथा नियोगस्यापि यजिं प्रति साध्यत्व-फके वाक्यभेदप्रसङ्गादिति चेत्। न। औपादानिकस्यापि फलसाधनत्वा(त्वेऽ)न्वि-ताभिधानेनुप्रवेशात्। करणाद्यन्वितकर्माभिधानव्युत्पत्तेः। नियोगस्य फल-साधनत्वं नान्विताभिधाननिविष्टमिति भेदः। तस्माद्वैरूप्यपरीहाराय मत्त्व-(मत्वर्थ)लक्षणाश्रयणं स्यात्। उत्पत्तिवाक्ये सोमेन यजेतेत्यादौ विनैव मत्व-र्थलक्षणास्विष्टित्रिधि.। अत एव न नामत्वम्। न हि तस्मिन् वाक्ये यजेः करणत्वं ज्ञाप्यम्,अधिकारवाक्य एव ज्ञातत्वात्। उत्पत्तिनियोगप्रतिज्ञाप्यमिति चेत्। न। न ह्यधिकारयोगं प्रति करणतामेवोत्पत्तिनियोगं प्रति, सा च ज्ञातैव। उत्पत्ति-नियोगप्रतियोगित्वं च तस्य तदवगममात्रमपेक्षते। अ(अं)गयागानां तु स्वापूर्वं प्रति कारणता सैवोत्पत्तिनियोगं प्रति,उत्पत्तिनियोगित्वं च कारणगताना-(नाम)धिकार वाक्ये बोधिते(तमि)ति तत्र, नामत्वं (न मत्वर्थं) विना विधि-

र्टविधिः। अत एव समिदादीनां नामत्वं केचिदाहुः। कार्यान्वितो हि स्वार्थः पदैरभिधेयः। तत्र गुणपदं यदि यजिमात्रान्वितं स्वार्थमाह न तदा कार्यान्वितं स्यात्। यदि तु व्रीहीनितिवत् कार्यसाधनतया स्वमुपस्थापयेत् ततस्वस्मिन्नेव कार्यान्वयो ज्ञेयो लक्ष्यश्चेति वैरूप्यापत्तिरतः तत्परीहाराय मत्वर्थलक्षणा स्यात्। अस्मिंश्च पक्षे सोमेन यजेतेत्यादावपि मत्वर्थलक्षणा। इदं तु वाच्यम्। मत्वर्थोप-लक्ष्यमाणः केन लक्ष्यते। यदि प्रातिपदिकेन ततः'पशुना यजेते'ति वाक्ये पशुपदेन पशुमन्य(द्य)जेर्लक्षितत्वात्। करणत्वे(त्वं)कत्वे पशुमद्यागो(गे) स्यातां गंगाया-मित्यत्र तीरगतमधिकरणत्वं न तु जलगतम्। अथ पशुपदेन यागवान् स्वार्थो लक्ष्यते। धवपदेन खादिरवान् स्वार्थो न तु पशुमान्यागः। ततः पशुगत एव करणत्वे उच्यते।

तन्न। तथापि तादृशेन गुणेन यजिनान्विताभिधानं कर्तव्य-मिति। तं प्रति साध्यत्वेनार्थोप्रणीय इति कुतो न वैरूप्यम्। न चैवं पशुपदेन मत्वर्थलक्षणा स्यात्। मतुपः प्रातिपदिकार्थमुक्तार्थप्रतिपादकत्वात्।

अथ यजिपदे मत्वर्थलक्षणा तदा तस्य विधायकत्वं न (म) त्वर्थलक्षकत्वं चेति विरोधः।

तत्र केचिद्यजिपदमेव लक्षकमाहुः, न तु ततः परोत्पन्नो मतुप्प्रत्ययः। किन्तु पशुमान्यजिरिति लक्षणार्थः। तदा च पशुपदमर्थवादः तस्य तु यादृशमुपनेयं तद्वतो यजिना स्वार्थस्य लक्षणात्। पशुपदमेव पश्वाधिकरणेति विचारितम्। अत एव पश्चिकायामुद्भिजत्वेति मत्व(त्वर्थ)लक्षणा दर्शिता। यजिनैव तादृशस्य लक्षणात्। न च लाक्षणिकत्वे विधायकत्वं न भवतीति वाच्यम्। प्रत्ययस्य विधायकत्वात्। अन्ये तु पशुपदमेव लक्षकम्। किन्तु न प्रातिपदिकमात्रम्। ततश्च विभक्तिमुख्यानुगतमेव स्वार्थमाह। प्रत्ययार्थयुक्तश्च प्रातिपदिकार्थो निष्पन्नः स्वार्थान्विततया यजिं लक्षयति।

नवा(न्व)न्विताभिधानपूर्वका लक्षणा नष्टेति वाच्यम् समासपदस्यापि लक्षकत्वात्। तस्मात्पशुनेति पद एव लक्षणा मत्वर्थस्य। न तु प्रातिपदिकमात्र एव। अत एवाह मत्वर्थो वाक्यवेलाया(मा)त्मक(क is ommited)वाक्यव-शाद्भवेत्। एकार्थपदवेलायां श्रूयमाणो हि दुर्वचः। तस्मात् सिद्धमुद्भिदा-दीनां तद्भयान्नामधेयत्वमिति॥

॥ इति महामहोपाध्यायमिश्रमुरारिकृतौ त्रिपादीनीतिनयनं समाप्तमिति॥